भूषणत्वे स्वभावस्य अलंकारत्वे स्वपरिस्पन्दस्य[1] यदा भूषणान्तरमलंकारान्तरं विधीयते तदा विहिते कृते, तस्मिन् सति, द्वयी गतिः संभवति। कासौ—तयोः स्वभावोक्त्यलंकारान्तरयोः[2] भेदावबोधो भिन्नत्वप्रतिभासः प्रकटः सुस्पष्टः कदाचिदप्रकटश्चापरिस्फुटो वेति। तदा स्पष्टे प्रकटे तस्मिन् सर्वत्र सर्वस्मिन्[3] कविवाक्ये संसृष्टिरेवैकालंकृतिः प्राप्नोति। अस्पष्टे तस्मिन्नप्रकटे सर्वत्रैवैकः संकरोऽलंकारः प्राप्नोति। ततः को दोषः स्यादित्याह—अलंकारान्तराणां च विषयो नावशिष्यते। अन्येषामलंकाराणामुपमादीनां विषयो गोचरो न कश्चिदप्यवशिष्यते, निर्विषयत्वमेवायातीत्यर्थः। ततस्तेषां लक्षणकरण[4]वैयर्थ्यप्रसङ्गः। यदि वा[5] तावेव संसृष्टिसंकरौ तेषां विषयत्वेन कल्प्येते तदपि न किंचित्, तैरेवालंकारैस्तस्यार्थस्यानङ्गीकृतत्वात्। इत्यनेनाकाशचर्वणप्रतिमेनालमलीकनिबन्धनेन। प्रकृतमनुसरामः। सर्वथा यस्य कस्यचित् पदार्थजातस्य[6] कविव्यापारविषयत्वेन वर्णनापदवीमवतरतः स्वभाव एव सहृदयाह्लादकारी काव्यशरीरत्वेन वर्णनीयतां प्रतिपद्यते। स एव च यथायोगं शोभातिशयकारिणा येन केनचिदलंकारेण योजयितव्यः। तदिदमुक्तम्—'अर्थः सहृदयाह्लादकारिस्वस्पन्दसुन्दरः' (१।९) इति। 'उभावेतावलंकार्यौ' (१।१०) इति च।

एवं शब्दार्थयोः परमार्थमभिधाय 'शब्दार्थौ' इति (१।७) काव्यलक्षणवाक्ये पदमेकं व्याख्यातम्। इदानीं 'सहितौ' इति (१।७) व्याख्यातुं साहित्यमेतयोः पर्यालोच्यते—

---

(1) परिस्पन्दस्य B. (2) ०अन्तर missing in A. (3) Wanting in A. (4) करण missing in A. (5) च B. (6) पदार्थस्य जातस्य A.

शब्दार्थौ सहितावेव प्रतीतौ स्फुरतः सदा ।
सहिताविति तावेव किमपूर्वं विधीयते ॥१६

शब्दार्थावभिधानाभिधेयौ सहितावेव[1] सदा सर्वकालं प्रतीतौ स्फुरतः ज्ञाने प्रतिभासेते । ततस्तावेव सहितावेव किमपूर्वं विधीयते न किंचिदपूर्वं[2] निष्पाद्यते, सिद्धं साध्यत इत्यर्थः । तदेवं शब्दार्थयोर्निसर्गसिद्धं[3] साहित्यं कः सचेताः पुनस्तदभिधानेन निष्प्रयोजनमात्मानमायासयति ? सत्यमेतत्, किन्तु न[4] वाच्यवाचकलक्षणशाश्वतसंबन्धनिबन्धनं वस्तुतः[5] साहित्यमित्युच्यते । यस्मादेतस्मिन् साहित्यशब्देनाभिधीयमाने कष्टकल्पनोपरचितानि गाङ्कुटादिवाक्यान्यसंबद्धानि शाकटिकादि[6]वाक्यानि च सर्वाणि साहित्यशब्देनाभिधीयेरन् । तेन पदवाक्यप्रमाणव्यतिरिक्तं किमपि तत्त्वान्तरं साहित्य[7]मिति विभागोऽपि न स्यात् । ननु च पदादिव्यतिरिक्तं यत्किमपि साहित्यं नाम तदपि सुप्रसिद्धमेव, पुनस्तदभिधानेऽपि कथं न पौनरुक्त्यप्रसङ्गः ? अतएवैतदुच्यते[8]—यदिदं[9] साहित्यं नाम तदेतावति[10] निःसीमनि समयाध्वनि[11] साहित्यशब्दमात्रेणैव[12] प्रसिद्धम् । न[13] पुनरेतस्य कविकर्मकौशलकाष्ठाधिरूढिरमणीयस्याद्यापि[14] कश्चिदपि विपश्चिदयमस्य परमार्थ इति मनाङ्मात्रमपि विचारपदवीमवतीर्णः । तदद्य सरस्वतीहृदयारविन्दमकरन्दबिन्दुसन्दोहसुन्दराणां

---

(1) ०तावेव युक्तावेव B. (2) अभूतं (for अपूर्वं) B. (3) स्वभाव० (for निसर्ग) B. (4) Wanting in A. (5) वस्तु न A. (6) शाकटिक० A. (7) ०हित्य० lost in A. (8) A has अ, then *lacunae* for two syllables, and then व तदुच्यते. (9) तदिदं A. (10) तदेव A. (11) सहिताध्वनि A. (12) साहित्यमात्रशब्देनैव B, (13) Wanting in A. (14) All letters after ०रमणीयस्य lost in A.

सत्कविवचसामन्तरामोद[1]मनोहरत्वेन परिस्फुरदेतत्[2] सहृदय[3]षट्चरणगोचरतां नीयते ।

साहित्यमनयोः शोभाशालितां प्रति काप्यसौ ।
अन्यूनानतिरिक्तत्वमनोहारिण्यवस्थितिः ॥१७॥

सहितयोर्भावः साहित्यम् । अनयोः शब्दार्थयोर्या काप्यलौकिकी चेतनचमत्कारकारितायाः कारणम् अवस्थितिर्विचित्रैव विन्यासभङ्गी । कीदृशी—अन्यूनानतिरिक्तत्वमनोहारिणी, परस्परस्पर्धित्वरमणीया । यस्यां द्वयोरेकरतस्यापि न्यूनत्वं निकर्षो न विद्यते नाप्यतिरिक्तत्वमुत्कर्षो वास्तीत्यर्थः । ननु च तथाविधं साम्यं द्वयोरुपहतयोरपि संभवतीत्याह—शोभाशालितां प्रति । शोभा सौन्दर्यमुच्यते । तया शालते श्लाघते यः स शोभाशाली, तस्य भावः शोभाशालिता, तां प्रति सौन्दर्यश्लाघितां प्रतीत्यर्थः । सैव च[4] सहृदयाह्लादकारिता । तस्यां स्पर्धित्वेन यासाववस्थितिः परस्परसाम्यसुभगमवस्थानं सा[5] साहित्यमुच्यते । तत्र वाचकस्य वाचकान्तरेण वाच्यस्य वाच्यान्तरेण साहित्यमभिप्रेतम्, वाक्ये काव्यलक्षणस्य परिसमाप्तत्वादिति प्रतिपादितमेव (१।७) ।

ननु च वाचकस्य वाच्यान्तरेण वाच्यस्य वाचकान्तरेण कथं न साहित्यमिति चेत्तन्न, क्रमव्युत्क्रमे प्रयोजनाभावादसमन्वयाच्च । तस्मादेतयोः शब्दार्थयोर्यथास्वं यस्यां स्वसम्पत्सामग्रीसमुदायः सहृदयाह्लादकारी परस्परस्पर्धया परिस्फुरति, सा काचिदेव वाक्यविन्याससम्पत् साहित्यव्यपदेशभाग् भवति ।

---

(1) All syllables after ०साम and before द lost in A. (2) This phrase is missing in A. (3) सहृदयहृदय A. (4) Wanting in A. (5) Wanting in B.

मार्गानुगुण्यसुभगो माधुर्यादिगुणोदयः ।
अलंकरणविन्यासो वक्रतातिशयान्वितः ।।३४।।

वृत्त्यौचित्यमनोहारि रसानां परिपोषणम् ।
स्पर्धया विद्यते यत्र यथास्वमुभयोरपि ।।३५।।

सा काप्यवस्थितिस्तद्विदानन्दस्पन्दसुन्दरा[1] ।
पदादिवाक्परिस्पन्दसारः साहित्यमुच्यते ।।३६।।

एतेषां च पदवाक्यप्रमाणसाहित्यानां चतुर्णामपि प्रतिवाक्य[2]मुपयोगः । तथा चैतत्पदमेवंस्वरूपं गकारौकारविसर्जनीयात्मकमेतस्य चार्थस्य प्रातिपदिकार्थपञ्चक[3]लक्षणस्याख्यातपदार्थषट्कलक्षणस्य वाचकमिति पदसंस्कारलक्षणस्य व्यापारः । पदानां च परस्परान्वयलक्षणसंबन्धनिबन्धनमेतद्वाक्यार्थ[4]तात्पर्यमिति वाक्यविचारलक्षणस्योपयोगः । प्रमाणेन प्रत्यक्षादिनैतदुपपन्नमिति युक्तियुक्तत्वं नाम प्रमाणलक्षणस्य प्रयोजनम् । इदमेव परिस्पन्दमाहात्म्यात्सहृदयहृदयहारितां[5] प्रतिपन्न[6]मिति साहित्यस्योपयुज्यमानता । एतेषां यद्यपि प्रत्येकं स्वविषये प्राधान्यमन्येषां गुणीभावस्तथापि सकलवाक्परिस्पन्दजीविताय[7]मानस्यास्य साहित्यलक्षणस्यैव कविव्यापारस्य[8] वस्तुतः सर्वत्रा-[9]तिशयित्वम् । यस्मादेतदमुख्यतयापि यत्र वाक्यसन्दर्भान्तरे स्वपरिमलमात्रेणैव संस्कारमारभते[10] तस्यैतदधिवास[11]शून्यतामात्रेणैव रामणीयकविरहः पर्यवस्यति । तस्मादुपादेयतायाः परिहाणिरुत्पद्यते । तथा च स्वप्रवृत्तिवैयर्थ्य[12]प्रसङ्गः[13] । शास्त्रातिरिक्तप्रयोजनत्वं शास्त्राभिधेयचतुर्वर्गाधिकफलत्वं चास्य पूर्वमेव प्रतिपादितम् (१।३,५) ।

---

(1) ०तद्विदाह्लादैकनिबन्धनम् A. (2) यथावाक्य A. (3) क missing in A. (4) ०अर्थ wanting in A. (5) सहृदयाह्लादकारितां A. (6) प्रति० lost in A. (7) ०विताय० lost in A. (8) Omitted in B. (9) सर्वा० B. (10) ०रमारभ० lost in A. (11) ०वासना B. (12) वैयर्थ्यं omitted in A. (13) A reads here (शास्त्रा)तिरिक्तप्रयोजनप्रसङ्गः ।

अपर्यालोचितेऽप्यर्थे बन्धसौन्दर्यसम्पदा ।
गीतवद्धृदयाह्लादं तद्विदां विदधाति यत् ।।३७।।

वाच्यावबोधनिष्पत्तौ पदवाक्यार्थवर्जितम् ।
यत्किमप्यर्पयत्यन्तः पानकास्वादवत्सताम् ।।३८।।

शरीरं जीवितेनेव स्फुरितेनेव जीवितम् ।
विना निर्जीवतां येन वाक्यं[1] याति विपश्चिताम् ।।३९।।

यस्मात्किमपि सौभाग्यं[2] तद्विदामेव गोचरम् ।
सरस्वती समभ्येति[3] तदिदानीं विचार्यते ।।४०।।

इत्यन्तरश्लोकाः ।

एवं सहिताविति व्याख्याय कविव्यापारवक्रत्वं व्याचष्टे—

कविव्यापारवक्रत्वप्रकाराः संभवन्ति षट् ।
प्रत्येकं बहवो भेदास्तेषां विच्छित्तिशोभिनः ।।१८।।

कवीनां व्यापारः कविव्यापारः काव्यक्रियालक्षणस्तस्य वक्रत्वं वक्रभावः प्रसिद्धप्रस्थानव्यतिरेकि वैचित्र्यं तस्य प्रकाराः प्रभेदाः षट् संभवन्ति । मुख्यतया तावन्त एव संभवन्तीत्यर्थः । तेषां प्रत्येकं प्रकाराः[4] बहवो भेदविशेषाः । कीदृशाः—विच्छित्तिशोभिनः वैचित्र्य-भङ्गीभ्राजिष्णवः । संभवन्तीति संबन्धः । तदेव दर्शयति—

वर्णविन्यासवक्रत्वं पदपूर्वार्धवक्रता ।
वक्रतायाः परोऽप्यस्ति प्रकारः प्रत्ययाश्रयः[5] ।।१९।।

वर्णानां विन्यासो वर्णविन्यासः अक्षराणां विशिष्टन्यसनं तस्य

---

(1) काव्यं B. (2) किमप्यसौभाग्यं B. (3) तमभ्येति A. (4) प्रतिकारं B. (5) B reads कारिका's 19, 20 consecutively.

वक्रत्वं वक्रभावः प्रसिद्धप्रस्थानव्यतिरेकिणा वैचित्र्येणोपनिबद्धः संनिवेशविशेषविहितस्तद्विदाह्लादकारी शब्दशोभातिशयः। यथा

प्रथममरुणच्छायस्तावत्ततः कनकप्रभ-
स्तदनु विरहोत्ताम्यत्तन्वीकपोलतलद्युतिः।
प्रसरति ततो ध्यान्तक्षोद[1]क्षमः क्षणदामुखे
सरसबिसिनीकन्दच्छेदच्छविर्मृगलाञ्छनः[2] ॥४१॥

अत्र वर्णविन्यासवक्रतामात्र[3]विहितः शब्दशोभातिशयः सुतरां समुन्मीलितः। एतदेव वर्णविन्यासवक्रत्वं चिरन्तनेष्वनुप्रास इति प्रसिद्धम्। अत्र च प्रभेदस्वरूपनिरूपणं लक्षणावसरे करिष्यते (२।१)।

पदपूर्वार्धवक्रता—पदस्य सुबन्तस्य तिङन्तस्य वा यत्पूर्वार्धं प्रातिपदिकलक्षणं धातुलक्षणं वा तस्य वक्रता वक्रभावो विन्यासवैचित्र्यम्। तत्र च बहवः प्रकाराः संभवन्ति। यत्र रूढिशब्दस्यैव प्रस्तावसमुचितत्वेन वाच्यप्रसिद्धधर्मान्तरा[4]ध्यारोपगर्भत्वेन निबन्धः स पदपूर्वार्धवक्रतायाः प्रथम प्रकारः। यथा

रामोऽस्मि सर्वं सहे[5] ॥ ४२ ॥

द्वितीयः—यत्र संज्ञाशब्दस्य वाक्य[6]प्रसिद्धस्य धर्मस्य लोकोत्तरातिशयाध्यारोपं गर्भीकृत्योपनिबन्धः। यथा

---

(1) ध्वंस (for क्षोद) in B. (2) सुभाषितावली no. 2004 (anon) =काव्यप्रकाश p. 260 (anon) =सरस्वतीकण्ठाभरण *ad* i. 87 (anon) = सदुक्तिकर्णामृत i. 396=अलङ्कारतिलक (वाग्भट) p. 45 (anon) = अलङ्कारशेखर *ad* viii. 1 (anon). The चन्द्रिका commentary on मम्मट says that this verse occurs in मालतीमाधव as a description of morning. But this is probably a mistake, as it does not occur in any MS of the drama. (3) मात्र wanting in A. (4) ०प्रसिद्धान्तरधर्मा A (5) महानाटक v. 7=ध्वन्यालोक p. 61 (anon) =प्रतिहारेन्दुराज p. 86=मुकुलभट्ट p. 11=काव्यप्रकाश p. 188 (anon). (6) वाच्यधर्म A.

रामोऽसौ भुवनेषु विक्रमगुणैः प्राप्तः प्रसिद्धिं परा-
मस्मद्भाग्यविपर्ययाद्यदि परं देवो न जानाति तम्[1] ।
वन्दीवैष[2] यशांसि गायति मरुद्यस्यैकबाणाहति-
श्रेणीभूतविशालताल[3]विवरोद्गीर्णैः स्वरैःसप्तभिः[4]।।४३।।

अत्र राम-शब्दो लोकोत्तरशौर्यादिधर्मातिशयाध्यारोपपरत्वेनोपात्तो वक्रतां प्रथयति ।

पर्यायवक्रत्वं प्रकारान्तरं पदपूर्वार्धवक्रतायाः[5]—यत्रानेकशब्दाभिधेयत्वे वस्तुनः किमपि पर्यायपदं प्रस्तुतानुगुणत्वेन प्रयुज्यते । यथा—

वामं कज्जलवद्विलोचनमुरो रोहद्विसारिस्तनं
मध्यं क्षाममकाण्ड एव विपुलाभोगा नितम्बस्थली ।
सद्यःप्रोद्गतविस्मयैरिति गणैरालोक्यमानं मुहुः
पायाद्वः प्रथमं वपुः स्मररिपोर्मिश्रीभवत्कान्तया ।।४४।।

अत्र 'स्मररिपोः' इति पर्यायः कामपि वक्रतामुन्मीलयति । यस्मात्कामशत्रोः कान्तया मिश्रीभावः शरीरस्य न कथंचिदपि[6] संभाव्यत[7] इति गणानां सद्यःप्रोद्गतविस्मयत्वमुपपन्नम् । सोऽपि पुनः पुनः परिशीलने-

---

(1) ताम् B. (2) चैष B. (3) ०साल A. (4) सप्तमैः A. This verse is quoted anonymously by the काव्यप्रकाश (pp. 182, 246). The commentators on मम्मट attribute it to the lost राघवानन्दनाटक. माणिक्यचन्द्र says that it forms the speech of कुम्भकर्ण in that drama ; while ०चन्द्रिका says that it is addressed by विभीषण to रावण in the same play. It is atrributed to विशाखदत्त in सदुक्तिकर्णामृत (see Dhruva's edition of मुद्राराक्षस, introd. p. xii). Also quoted anonymously in the सरस्वतीकण्ठाभरण (p. 341). (5) ०वक्रता० lost in A. (6) कथञ्चित् A. (7) संभाव्य A.

नाश्चर्यकारीति 'प्रथम'-पदस्य[1] जीवितम्। एतच्च पर्यायवक्रत्वं वाच्यासंभविधर्मान्तर[2]गर्भीकारेणापि दृश्यते। यथा

अङ्गराज सेनापते राजवल्लभ रक्षैनं भीमाद्दुःशासनम्[3] इति ॥४५॥

अत्र त्रयाणामपि पर्यायाणा[4]मसंभाव्यमानतत्परित्राणपात्रत्वलक्षण-मकिंचित्करत्वं गर्भीकृत्योपहस्यते—रक्षैनमिति।

पदपूर्वार्धवक्रताया उपचारवक्रत्वं नाम प्रकारान्तरं विद्यते—यत्रामूर्तस्य वस्तुनो मूर्तद्रव्याभिधायिना शब्देनाभिधानमुपचारात्। यथा—निष्कारणं निकारकणिकापि मनस्विनां मानसमायासयति। यथा—हस्तापचेयं यशः। 'कणिका'-शब्दो[5] मूर्तवस्तुस्तोकार्थाभिधायी[6] स्तोकत्वसामान्योपचारादमूर्तस्यापि निकारस्य स्तोकाभिधान-परत्वेन[7] प्रयुक्तस्तद्विदाह्लादकारित्वाद्वक्रतां पुष्णाति। 'हस्तापचेयम्' इति मूर्तपुष्पादिवस्तु[8]संभविसंहतत्वसामान्योपचारादमूर्तस्यापि यशसो हस्तापचेयमित्यभिधानं वक्रत्वमावहति। द्रवरूपस्य[9] वस्तुनो वाचकशब्दस्तरङ्गितत्वादिधर्म[10]निबन्धनः किमपि सादृश्यमात्रमव-लम्ब्य संहतस्यापि वाचकत्वेन प्रयुज्यमानः कविप्रवाहे प्रसिद्धः। यथा

श्वासो[11]त्कम्पतरङ्गिणि स्तनतटे[12] इति ॥४६॥

क्वचिदमूर्तस्यापि द्रवरूपार्थाभिधायी वाचकत्वेन प्रयुज्यते। यथा

---

(1) शब्दस्य B, for पदस्य. (2) ०सम्भव० only, A. (3) वेणीसंहार, *ad* iii. 47, p 46=व्यक्तिविवेक p 45 (4) अपि पर्यायाणां dropped in B. (5) The whole passage from मूर्तद्रव्याभिधायिना up to this word is dropped in A. समुद्रबन्ध (p. 9) substantially quotes this passage. (6) मूर्तद्रव्याभिधायी only in A. (7) सूचकोभिधान० B. (8) वस्तु missing in A. (9) द्रव्य० A. (10) धर्म wanting in A. (12) कवीन्द्र-वचनसमुच्चय no. 450 (anon). This verse is quoted in full below.

एकां कामपि कालविप्रुषममी शौर्योष्मकण्डूव्यय-
व्यग्राः स्युश्चिरविस्मृतामरचमूडिम्बाहवा[1] बाहवः ।।४७।।

एतयोस्तरंगिणीति विप्रुषमिति च वक्रतामावहतः ।

विशेषणवक्रत्वं नाम पदपूर्वार्धवक्रतायाः प्रकारो विद्यते—यत्र विशेषणमाहात्म्यादेव तद्विदाह्लादकारित्वलक्षणं वक्रत्वमभिव्यज्यते । यथा—

दाहोऽम्भःप्रसृतिपचः प्रचयवान् बाष्पः प्रणालोचितः
श्वासाः प्रेङ्खितदीप्रदीपलतिकाः[2] पाण्डिम्नि मग्नं वपुः ।
किंचान्यत्कथयामि रात्रिमखिलां त्वन्मार्ग[3]वातायने
हस्तच्छत्त्रनिरुद्धचन्द्रमहसस्तस्याः स्थितिर्वर्तते[4] ।।४८।।

अत्र दाहो बाष्पः श्वासा वपुरिति न किंचिद्वैचित्र्यमुन्मीलितम् । प्रत्येकं विशेषणमाहात्म्यात्पुनः काचिदेव वक्रताप्रतीतिः । यथा च

व्रीडायोगा[5]न्नतवदनया संनिधाने गुरूणां
बद्धोत्कम्पस्तनकलशया[6] मन्युमन्तर्नियम्य ।
तिष्ठेत्युक्तं किमिव न तया यत्समुत्सृज्य बाष्पं
मय्यासक्तश्चकित[7]हरिणीहारिनेत्रत्रिभागः[8] ।।४९।।

अत्र चकितहरिणीहारीति क्रियाविशेषणं नेत्रत्रिभागासङ्गस्य गुरुसंनिधानविहिताप्रगल्भत्वरमणीयस्य कामपि कमनीयतामावहति[9] चकितहरिणीहारिविलोचनसाम्येन ।

---

(1) ०डिम्बाहवा lost in A. This verse is quoted in full in ch. iii. (2) दीपदीप्तकलिकाः A. (3) त्वद्वक्त्र० A. (4) विद्धशालभञ्जिका ii. 21=सुभाषितावली no. 1411=कवीन्द्रवचन० no. 276=रुय्यक p. 68 (anon)=Jayaratha p 41 (anon)=अलङ्कारशेखर p. 68 (anon) =चित्रमीमांसा p. 103 (anon). (5) व्रीडालोका० A. (6) वेधोत्कम्पस्तनकलशयोः B. (7) ०श्चकित० lost in A. (8) शार्ङ्गधरपद्धति no. 3464 (नेत्रत्रिभागब्रह्मयशखिनः)=सुभाषितावली no, 1335 (यशःस्वामिनः)=ध्वन्यालोक p. 132 (anon). (9) पुष्णाति (for आवहति) B.

अयमपरः पदपूर्वार्धवक्रतायाः प्रकारो यदिदं संवृतिवक्रत्वं नाम— यत्र पदार्थस्वरूपं प्रस्तावानुगुण्येन[1] केनापि निकर्षेणोत्कर्षेण वा युक्तं व्यक्ततया साक्षादभिधातुमशक्यं संवृतिसामर्थ्योपयोगिना शब्देनाभिधीयते। यथा

सोऽयं दम्भधृतव्रतः प्रियतमे कर्तुं किमप्युद्यतः[2] ॥५०॥

अत्र वत्सराजो वासवदत्ताविपत्ति[3]विधुरहृदयस्तत्प्राप्तिप्रलोभनवशेन पद्मावतीं परिणेतुमीह[4]मानस्तदेवाकरणीयमित्यवगच्छन् तस्य वस्तुनो महापातकस्येवाकीर्तनीयतां ख्यापयति किमपीत्यनेन संवरणसमर्थेन सर्वनामपदेन। यथा च

निद्रानिमीलितदृशो मदमन्थराया[5]
नाप्यर्थवन्ति न च यानि निरर्थकानि।
अद्यापि मे वरतनोर्मधुराणि[6] तस्या-
स्तान्यक्षराणि हृदये किमपि ध्वनन्ति[7] ॥५१॥

---

(1) ०वानुगुणेन A. (2) This forms the last line of the verse चक्षुर्यस्य तवाननादपगतम् from तापसवत्सराजचरित. Kuntaka quotes this verse in full in ch. iv. See below, abstract of that chapter for reference. (3) ०विवर्त्ति A. (4) ०णेतुमपी B. (5) ०मन्थराणि B. (6) गदितानि B, for मधुराणि. (7) चौरपञ्चाशिका (ed. Solf, no. 36). This verse does not occur in Bohlen's edition (Berlin 1833). Since this verse is quoted (anonymously) in ०अवलोक on दशरूपक (ed. Parab, *ad* iv. 23), and in ०*Locana*, p. 60, विल्हण's authorship of the verse appears doubtful. In सुभाषितावली (no. 1280) and जल्हणकृत सूक्तिमुक्तावली (74a), this श्लोक is attributed to कलशक Quoted also anonymously in Hemacandra p. 89 and Samudrabandha p. 9 (समुद्रबन्ध probably quotes it from the वक्रोक्तिजीवित itself).

अत्र किमपीति तदाकर्णनविहितायाश्चित्तचमत्कृतेरनुभवैकगोचरत्व-लक्षणमव्यपदेश्यत्वं प्रतिपाद्यते[1]। तानीति[2] तथाविधानुभवविशिष्ट-तया स्मर्यमाणानि। नाप्यर्थवन्तीति स्वसंवेद्यत्वेन व्यपदेशाविषयत्वं प्रकाश्यते। तेषां च न च यानि निरर्थकानीत्यलौकिकचमत्कार-कारित्वादपार्थकत्वं निवार्यते। त्रिष्वप्येतेषु विशेषणवक्रत्वं प्रतीयते।

इदमपरं पदपूर्वार्धवक्रतायाः प्रकारान्तरं संभवति वृत्तिवैचित्र्य-वक्रत्वं नाम—यत्र समासादितवृत्तीनां कासांचिद् विचित्राणामेव कविभि परिग्रहः क्रियते। यथा

मध्येऽङ्कुरं पल्लवाः[3] ॥५२॥

यथा च

पाण्डिम्नि मग्नं वपुः[4] ॥५३॥

यथा वा

सुधाविसरनिष्यन्दसमुल्लासविधायिनि।
हिमधामनि खण्डेऽपि न जनो नोन्मनायते ॥५४॥

अपरं लिङ्गवैचित्र्यं नाम पदपूर्वार्धवक्रतायाः प्रकारान्तरं दृश्यते—यत्र भिन्नलिङ्गानामपि शब्दानां वैचित्र्या य सामानाधिकरण्योप-निबन्धः। यथा

इत्थं जडे जगति को नु बृहत्प्रमाण-
कर्णः[5] करी ननु भवेद् ध्वनितस्य पात्रम् ॥५५॥

यथा च

मैथिली तस्य दाराः[6] ॥ इति[7] ॥५६॥

---

(1) This passage is quoted by समुद्रबन्ध p. 9. (2) तानि only, B. (3) विद्धशालभञ्जिका i. 23. (4) See above p. 33, śl. 48. (5) कण्ठः (for कर्णः) A. Quoted in full in सुभाषितावली no. 628 (भट्टवासुदेवस्य). The verse is given in full below, ch. ii. (6) बालरामायण iii. 27, p. 64 (7) इति omitted in A.

अन्यदपि लिङ्गवैचित्र्यवक्रत्वम्——यत्रानेकलिङ्गसंभवेऽपि सौकुमार्यात् कविभिः स्त्रीलिङ्गमेव प्रयुज्यते, 'नामैव स्त्रीति पेशलम्' (२।२२) इति कृत्वा । यथा[1]

एतां पश्य पुरस्तटीम्[2] इति ।।५७।।

पदपूर्वार्धस्य धातोः क्रियावैचित्र्यवक्रत्वं नाम वक्रत्वप्रकारान्तरं विद्यते——यत्र क्रियावैचित्र्यप्रतिपादनपरत्वेन[3] वैदग्ध्य[4]भङ्गीभणिति-रमणीयान् प्रयोगान् निबध्नन्ति कवयः । तत्र[5] क्रियावैचित्र्यं बहुविधं विच्छित्तिविततव्यवहारं दृश्यते । यथा

रइकेलिहिअणिअंसणकरकिसलअरुद्धणअणजुअलस्स
रुद्दस्स तइअणअणं पव्वइपरिचुम्बिअं जअइ[6] ।।५८।।

अत्र समानऽपि हि[7] स्थगनप्रयोजने साध्ये तुल्ये च लोचनत्वे, देव्याः परिचुम्बनेन यस्य निरोधः संपाद्यते तद्भगवतस्तृतीयं[8] नयनं जयति सर्वोत्कर्षेण वर्तत इति वाक्यार्थः । अत्र जयतीति क्रियापदस्य किमपि सहृदयहृदयसंवेद्यं वैचित्र्यं[9] परिस्फुरदेव लक्ष्यते । यथा

स्वेच्छाकेसरिणः स्वच्छस्वच्छायायासितेन्दवः ।
त्रायन्तां वो मधुरिपोः प्रपन्नार्तिच्छिदो नखाः[10] ।।५९।।

---

(1) Wanting in A. (2) दशरूपकावलोक p. 41 (anon)=Hemcandra p. 297 (anon)=सरस्वतीकण्ठा० p. 300 (anon), This verse is quoted in full below, at ii. 22. (3) ०पादनद्वारेण परत्वेन A. (4) वैचित्र्य A. (5) तच्च A.

(6) रतिकेलिहृतनिवसनकरकिसलयरुद्धनयनयुगलस्य ।
रुद्रस्य तृतीयनयनं पार्वतीपरिचुम्बितं जयति ।। इति छाया ।

गाथासप्तशतक (ed. Weber) 455=काव्यप्रकाश p. 168. (7) Wanting in B. (8) तृतीयं missing A. (9) ०वेद्यं वै lost in A. (10) This is मङ्गलश्लोक to the वृत्ति of the ध्वन्यालोक.

अत्र नखानां[1] सकललोकप्रसिद्धच्छेदनव्यापारव्यतिरेकि किमप्यपूर्वमेव प्रपन्नार्तिच्छेदनलक्षणं क्रियावैचित्र्यमुपनिबद्धम् । यथा च

स दहतु दुरितं शाम्भवो वः शराग्निः[2] ।।६०।।

अत्र च पूर्वदेव क्रियावैचित्र्यप्रतीतिः[3] । यथा च

कण्णुप्पलदलमिलिअलोअणेहिं
हेलालोलणमाणिअणअणेहिं ।
लीलइ लीलावईहि णिरुद्धओ
सिढिलिअचाओ जअइ मअरद्धओ[4] ।।६१।।

अत्र लोचनैर्लीलया लीलावतीभिर्निरुद्धः स्वव्यापारपराङ्मुखीकृतः सन्[5] शिथिलीकृतचापः कन्दर्पो जयति सर्वोत्कर्षेण वर्तत इति किमुच्यते, यतस्तास्तथाविधविजयावाप्तौ सत्यां जयन्तीति वक्तव्यम् । तदयमत्राभिप्रायः—यत्त[6]ल्लोचनविलासानामेवंविधं जैत्रताप्रौढभावं पर्यालोच्य चेतनत्वेन स स्वचापारोपणायासमुपसंहृतवान् । यतस्तेनैव त्रिभुवनविजयावाप्तिः परिसमाप्यते । ममेति मन्यमानस्य तस्य सहायत्वो[7]त्कर्षातिशयो जयतीति क्रियापदेन[8] कर्तृतायाः कारणत्वेन

---

(1) नखा lost in A. (2) अमरुशतक, श्लो० 2. (3) ०वैचित्र्यप्रसिद्धिः A. (4) A reads ०सलोणेहिं in the first line, ०लोलणो and णअणीहिं in the second line ; लीलाए and लीलावलीहि in the third, सिहिलिअचाओ in the last line. B reads ०सलोणिहिं in the first line ; हेलालोलवमालिहि in the second line ; निरद्धउ in the third line, ०चाउ and मअरद्धउ in the last line. The conjectural छाया of the verse would be :

कर्णोत्पिलदलमिलितलोचनैर्हेलालोलनमानितनयनाभिः ।
लीलया लीलावतीभिर्निरुद्धः शिथिलीकृतचापो जयति मकरध्वजः ।।

If we read ०सलोणेहिं in the first line with MS A, then would it mean ०सलावण्यैः, qualifying णअणेहिं, which would be नयनैः, in second line ? (5) स A. (6) यदेत B. (7) सहृदयत्वो० B. (8) ०पद B.

कवेश्चेतसि परिस्फुरितः। तेन किमपि क्रियावैचित्र्यमत्र तद्विदाह्लाद-कारि प्रतीयते। यथा च

तान्यक्षराणि हृदये किमपि ध्वनन्ति[1] ।।६२।।

अत्र जल्पन्ति वदन्तीत्यादि न प्रयुक्तम्, यस्मात्ताणि कयापि विच्छित्त्या किमप्यनाख्येयं समर्पयन्तीति कवेरभिप्रेतम्।

वक्रतायाः परोऽप्यस्ति प्रकारः प्रत्ययाश्रयः[2] इति। वक्रभाव-स्यान्योऽपि प्रभेदो विद्यते। कीदृशः—प्रत्ययाश्रयः। प्रत्ययः सुप्तिङ् च यस्याश्रयः स्थानं स तथोक्तः। तस्यापि बहवः प्रकाराः संभवन्ति—संख्यावैचित्र्यविहितः, कारकवैचित्र्यविहितः, पुरुषवैचित्र्यविहितश्च। तत्र, संख्यावैचित्र्यविहितः—यस्मिन् वचनवैचित्र्यं काव्यबन्धशोभायै[3] निबध्यते। यथा

मैथिली तस्य दाराः[4] ।।इति ।।६३।।

यथा च

फुल्लेन्दीवरकाननानि नयने पाणी सरोजाकराः[5] ।।६४।।

अत्र द्विवचनबहुवचनयोः सामानाधिकरण्यमतीव चमत्कारकारि। कारकवैचित्र्यविहितः—यत्राचेतनस्यापि पदार्थस्य चेतनत्वाध्या-रोपेण चेतनस्यैव क्रियासमावेशलक्षणं रसादिपरिपोषणार्थं कर्तृत्वादि-कारकं[6] निबध्यते। यथा

स्तनद्वन्द्वं मन्दं स्नपयति बलाद्बाष्पनिवहो
हठादन्तःकण्ठं[7] लुठति सरसः पञ्चमरवः।

---

(1) See above p. 34. (2) This is part of कारिका 19, which is now taken up for comment, (3) काव्यशोभोपनिबन्धनाय B. (4) See above p. 35. (5) तापसवत्सराज० (Berlin MS, i. 68b). (6) कारकत्वं A. (7) कण्ठे B.

शरज्ज्योत्स्नापाण्डुः पतति च कपोलः करतल
न जानीमस्तस्याः क इव हि विकार[1]व्यतिकरः ।।६५।।

अत्र बाष्पनिवहादीनामचेतनानामपि चेतनत्वाध्यारोपेण कविना कर्तृत्वमुपनिबद्धम्---यत्तस्या[2] विवशायाः सत्यास्तेषामेवंविधो व्यवहारः, सा पुनः स्वयं न किंचिदप्याचरितुं समर्थेत्यभिप्रायः। अन्यच्च कपोलादीनां तद[3]वयवानामेतदवस्थत्वं प्रत्यक्षतया-स्मदादिगोचरतामापद्यते, तस्याः पुनर्योऽसावन्तर्विकारव्यतिकरस्तं[4] तदनुभवैकविषयत्वाद्वयं न जानीमः। यथा च

चापाचार्यस्त्रिपुरविजयी कार्तिकेयो विजेयः
शस्त्रव्यस्तः सदनमुदधिर्भूरियं हन्तकारः।
अस्त्येवैतत् किमु कृतवता रेणुकाकण्ठबाधां
बद्धस्पर्धस्तव परशुना लज्जते चन्द्रहासः[5] ।।६६।।

अत्र चन्द्रहासो लज्जत इति पूर्ववत् कारकवैचित्र्यप्रतीतिः। पुरुषवैचित्र्यविहितं वक्रत्वं विद्यते---यत्र प्रत्यक्तापरभावविपर्यासं प्रयुञ्जते कवयः, काव्यवैचित्र्यार्थं युष्मद्यस्मदि वा प्रयोक्तव्ये प्रातिपदिकमात्रं निबध्नन्ति। यथा

अस्मद्भाग्यविपर्ययाद्यदि परं देवो न जानाति तम्[6] ।।६७।।

अत्र त्वं न जानासीति वक्तव्ये वैचित्र्याय देवो न जानातीत्युक्तम्। एवं[7] युष्मदादिविपर्यासः क्रियापदं विना प्रातिपदिकमात्रेऽपि दृश्यते। यथा

अयं जनः प्रष्टुमनास्तपोधने
न चेद्रहस्यं प्रतिवक्तुमर्हसि[8] ।।६८।।

---

(1) विकारस्य B. (2) यदि तस्या B. (3) A omits तद०. (4) A omits तं (5) बालरामायण ii. 37 (p. 42)=काव्यप्रकाश pp. 323, 354 व्यक्तिविवेक pp. 45, 66. (6) See above p. 31. (7) एष हि A. (8) कुमारसम्भव v. 40.

अत्राहं प्रष्टुकाम इति वक्तव्ये ताटस्थ्यप्रतीत्यर्थमयं जन इत्युक्तम् यथा वा ।

सोऽयं दम्भधृतव्रतः[1] इति ।।६८।।

अत्र सोऽहमिति वक्तव्ये पूर्ववद् 'अयम्' इति वैचित्र्यप्रतीतिः । एते च मुख्यतया वक्रताप्रकाराः कतिचिन्निदर्शनार्थं प्रदर्शिताः । शिष्टाश्च सहस्रशः संभवन्तीति महाकविप्रवाहे सहृदयैः स्वयमेवोत्प्रेक्षणीयाः ।

एवं वाक्यावयवानां पदानां[2] प्रत्येकं वर्णाद्यवयवद्वारेण यथासंभवं वक्रभावं व्याख्यायेदानीं पदसमुदायभूतस्य वाक्यस्य वक्रता व्याख्यायते—

वाक्यस्य वक्रभावोऽन्यो भिद्यते यः सहस्रधा ।
यत्रालंकारवर्गोऽसौ सर्वोऽप्यन्तर्भविष्यति[3] ।। २० ।।

वाक्यस्य वक्रभावोऽन्यः । वाक्यस्य पदसमुदायभूतस्य । आख्यातं साव्ययकारकविशेषणं वाक्यमिति यस्य प्रतीतिस्तस्य श्लोकादेर्वक्रभावो भङ्गीभणितिवैचित्र्यम् अन्यः पूर्वोक्तवक्रताव्यतिरेकी समुदायवैचित्र्यनिबन्धः कोऽपि संभवति । यथा

उपस्थितां पूर्वमपास्य लक्ष्मीं
वनं मया सार्धमसि प्रपन्नः ।
त्वामाश्रयं प्राप्य तया नु कोपा-
त्सोढास्मि न त्वद्भवने वसन्ती[4] ।।७०।।

एतत्सीतया तथाविधकरुणाक्रान्तान्तःकरणया वल्लभं प्रति संदिश्यते —यदुपस्थितां सेवासमापन्नां लक्ष्मीमपास्य श्रियं परित्यज्य पूर्वं यस्त्वं

(1) See above p. 34. (2) A omits this word. (3) This कारिका is quoted by समुद्रबन्ध p. 9. (4) रघुवंश xiv. 60.

मया सार्धं वनं प्रपन्नो विपिनं प्रयातस्तस्य तव स्वप्नेऽप्येतन्न संभाव्यते । तया पुनस्तस्मादेव कोपात् स्त्रीस्वभावसमुचितसपत्नीविद्वेषात्त्वद्गृहे वसन्ती न सोढास्मि । तदिदमुक्तं भवति—यत्तस्मिन् विधुरदशाविसंष्ठुलेऽपि समये तथाविधप्रसादास्पदतामध्यारोप्य यदिदानीं साम्राज्ये निष्कारणपरित्यागतिरस्कारपात्रतां नीतास्मीत्येतदुचितमनुचितं वा विदितव्यवहारपरंपरेण भवता स्वयमेव[1] विचार्यतामिति ।

स च वक्रभावस्तथाविधो यः सहस्रधा भिद्यते बहुप्रकारं भेदमासादयति । सहस्र-शब्दोऽत्र संख्याभूयस्त्वमात्रवाची, न नियतार्थ[2]-वृत्तिः, यथा—सहस्रदलमिति[3] । यस्मात् कविप्रतिभानामानन्त्यान्नियतत्वं न संभवति । योऽसौ वाक्यस्य वक्रभावो बहुप्रकारः, न जानीमस्तं कीदृशमित्याह—यत्रालंकारवर्गोऽसौ सर्वोऽप्यन्तर्भविष्यति । यत्र यस्मिन्नसावलंकारवर्गः कविप्रवाहप्रसिद्धप्रतीतिरुपमादिरलंकरणकलापः सर्वः सकलोऽप्यन्तर्भविष्यति[4] अन्तर्भावं व्रजिष्यति[5] पृथक्त्वेन नावस्थाप्यते[6] । तत्प्रकारभेदत्वेनैव[7] व्यपदेशमासादयिष्यतीत्यर्थः । स चालंकारवर्गः स्वलक्षणावसरे प्रतिपदमुदाहरिष्यते ।

एवं वाक्यवक्रतां व्याख्याय वाक्यसमूहरूपस्य प्रकरणस्य तत्समुदायात्मकस्य च प्रबन्धस्य वक्रता व्याख्यायते—

वक्रभावः प्रकरणे प्रबन्धे वास्ति[8] यादृशः ।
उच्यते सहजाहार्यसौकुमार्यमनोहरः ॥२१॥

वक्रभावो विन्यासवैचित्र्यं प्रबन्धैकदेशभूते प्रकरणे यादृशोऽस्ति यादृग् विद्यते प्रबन्धे वा नाटकादौ सोऽप्युच्यते कथ्यते[9] । कीदृशः—सहजाहार्यसौकुमार्यमनोहरः । सहजं स्वाभाविकमाहार्यं व्युत्पत्त्यु-

---

(1) स्व lost in A. (2) नियता० lost in A. (3) सहस्रसवव्यमिति B. (4) अन्तर्भविष्यति omitted in B. (5) अनुभविष्यति for व्रजिष्यति A. (6) नावस्थास्यते B. (7) ०स्वभाव A, for भेद. (8) अप्यस्ति A. (9) omitted in A.

पार्जितं यत्सौकुमार्यं रामणीयकं तेन मनोहरो हृदयहारी यः स तथोक्तः। तत्र प्रकरणे वक्रभावो यथा—रामायणे मारीचमाया-मयमाणिक्यमृगानुसारिणो रामस्य करुणाक्रन्दाकर्णनकातरान्तः-करणया जनकराजपुत्र्या तत्प्राणपरित्राणाय स्वजीवितपरिरक्षानिर-पेक्षया[1] लक्ष्मणो निर्भर्त्स्य प्रेषितः। तदेतदत्यत्तमनौचित्ययुक्तम्[2], यस्मादनुचरसंनिधाने प्रधानस्य तथाविधव्यापारकरण[3]मसंभावनीयम्। तस्य च सर्वातिशयचरितयुक्तत्वेन वर्ण्यमानस्य तेन कनीयसा प्राण-परित्राणसंभावनेत्येतदत्यन्तमसमीचीनमिति पर्यालोच्य उदात्तराघवे[4] कविना वैदग्ध्यवशेन मारीचमृगमारणाय प्रयातस्य परित्राणार्थं लक्ष्म-णस्य सीतया कातरत्वेन रामः प्रेरितः इत्युपनिबद्धम्। अत्र च तद्विदा-ह्लादकारित्वमेव वक्रत्वम्। यथा च किरातार्जुनीये किरातपुरुषो-क्तिषु[5] वाच्यत्वेन स्वमार्गणमार्गणमात्र[6]मेवोपक्रान्तम्। वस्तुतः पुनरर्जुनेन सह तात्पर्यार्थपर्यालोचनया विग्रहो वाक्यार्थतामुपनीतः। तथा च तत्रैवोच्यते—

प्रयुज्य सामाचरितं विलोभनं
भयं विभेदाय धियः प्रदर्शितम्
तथाभियुक्तं च शिलीमुखार्थिना
यथेतरन्न्याय्यमिवावभासते[7] ॥७१॥

प्रबन्धे वक्रभावो यथा—कुत्रचिन्महाकविविरचिते राम[8]कथोप-निबन्धे नाटकादौ पञ्चविधवक्रतासामग्रीसमुदायसुन्दरं सहृदय-

---

(1) निरपेक्ष omitted in A, which reads ०परिरक्षाया only. (2) ०युक्तमुक्तम् A. (3) व्यापारणं A. (4) This lost drama is quoted in दशरूपकावलोक, by Hemacandra and in साहित्यदर्पण. (5) B omits किरात, but A reads किरातपुरुषोक्तिरिति. (6) स्वमार्ग-मार्गण० A ; स्वमार्गणमात्र० B. (7) किरात० xiv. 7. (8) रामायण० A.

हृदयहारि महापुरुषवर्णनमुपक्रमे प्रतिभासते। परमार्थतस्तु विधि-निषेधात्मकधर्मोपदेशः पर्यवस्यति, रामवद्वर्तितव्यं न रावणवदिति। यथा च, तापसवत्सराजे कुसुमसुकुमारचेतसः सरसविनोदैकरसिकस्य नायकस्य चरितवर्णनमुपक्रान्तम्। वस्तुतस्तु व्यसनार्णवे निमज्ज-न्निजो राजा तथाविधनयव्यवहारनिपुणैरमात्यैस्तैस्तैरुपायैरुत्तारणीय इत्युपदिष्टम्। एतच्च स्वलक्षणव्याख्यानावसरे व्यक्ततामाया-स्यति।

एवं कविव्यापारवक्रताषट्कमुद्देशमात्रेण व्याख्यातम्। विस्तरेण तु स्वलक्षणावसरे व्याख्यास्यते।

क्रमप्राप्तत्वेन बन्धोऽधुना व्याख्यास्यते—

वाच्यवाचकसौभाग्यलावण्यपरिपोषकः।
व्यापारशाली वाक्यस्य[1] विन्यासो बन्ध उच्यते ॥२२॥

विन्यासो विशिष्टं न्यसनं यः सन्निवेशः स एव व्यापारशाली बन्ध-उच्यते। व्यापारोऽत्र प्रस्तुतकाव्यक्रियालक्षणः। तेन शालते श्लाघते यः स तथोक्तः। कस्य—वाक्यस्य श्लोकादेः। कीदृशः—वाच्य-वाचकसौभाग्यलावण्यपरिपोषकः। वाच्यवाचकयोर्द्वयोरपि वाच्य-स्याभिधेयस्य वाचकस्य च शब्दस्य वक्ष्यमाणं सौभाग्यलावण्यलक्षणं यद्गुणद्वयं तस्य परिपोषकः पुष्टतातिशयकारी। सौभाग्यं प्रतिभा-संरम्भफलभूतं चेतनचमत्कारित्वलक्षणम्, लावण्यं संनिवेशसौन्दर्यम्, तयोः परिपोषकः। यथा

दत्त्वा वामकरं नितम्बफलके लीलाबलन्मध्यया
प्रोत्तुङ्गस्तनमंसचुम्बिचिबुकं कृत्वा तया मां प्रति

---

(1) The reading of the commentary is वाक्यस्य which is preferable, although the MS here reads काव्यस्य in the कारिका.

प्रान्तप्रोतनवेन्द्रनीलमणिमन्मुक्तावलीविभ्रमाः
सासूयं प्रहिताः स्मरज्वरमुचो द्वित्राः कटाक्षच्छटाः[1] ।।७२।।

अत्र समग्रकविकौशलसंपाद्यस्य चेतनचमत्कारित्वलक्षणस्य सौभाग्यस्य कियन्मात्रवर्णविन्यासविच्छित्तिविहितस्य पदसंधानसम्पदुपार्जितस्य च लावण्यस्य परः परिपोषो विद्यते ।

एवं च स्वरूपमभिधाय तद्विदाह्लादकारित्वमभिधत्ते—

वाच्यवाचकवक्रोक्तित्रितयातिशयोत्तरम् ।
तद्विदाह्लादकारित्वं किमप्यामोदसुन्दरम् ।।२३।।

तद्विदाह्लादकारित्वं काव्यविदानन्दविधायित्वम् । कीदृशम्—वाच्यवाचकवक्रोक्तित्रितयातिशयोत्तरम् । वाच्यमभिधेयं वाचकं शब्दो वक्रोक्तिरलंकरणम्, एतस्य त्रितयस्य योऽतिशयः कोऽप्युत्कर्षस्तस्मादुत्तरमतिरिक्तम् । स्वरूपेणातिशयेन च स्वरूपेणान्यत् किमपि तत्त्वान्तरमेतदतिशयेनैतस्मात्त्रितयादपि लोकोत्तरमित्यर्थः । अन्यच्च कीदृशम्—किमप्यामोदसुन्दरम् । किमप्यव्यपदेश्यं सहृदयहृदयसंवेद्यम् आमोदः सुकुमारवस्तुधर्मो रञ्जकत्वं नाम, तेन सुन्दरं रञ्जकत्वरमणीयम् । यथा

हंसानां निनदेषु यैः कवलितैरासज्यते कूजता-
मन्यः कोऽपि कषायकण्ठलुठनादाघर्घरो विभ्रमः ।
ते संप्रत्यकठोरवारणवधूदन्तांङ्कुरस्पर्धिनो
निर्याताः कमलाकरेषु बिसिनीकन्दाग्रिमग्रन्थयः[2]।।७३।।

अत्र त्रितयेऽपि वाच्यवाचकवक्रोक्तिलक्षणे प्राधान्येन न कश्चिदपि कवः संरम्भो विभाव्यते । किंतु प्रतिभावैचित्र्यवशेन किमपि तद्विदाह्लादकारित्वमुन्मीलितम् । यद्यपि सर्वेषामुदाहरणानामविकलकाव्यलक्षणपरिसमाप्तिः संभवति तथापि यत्प्राधान्येनाभिधीयते

(1) कवीन्द्रवचन २१३ (anon).
(2) Quoted anonymously in ध्वन्यालोक ch. iv, p. 242.

स एवांशः प्रत्येकमुद्रिक्ततया तेषां परिस्फुरतीति सहृदयैः स्वयमेवोत्प्रेक्षणीयम् ।

एवं काव्यसामान्यलक्षणमभिधाय तद्विशेषलक्षणविषयप्रदर्शनार्थं मार्गभेदनिबन्धनं त्रैविध्यमभिधत्ते—

संप्रति तत्र ये मार्गाः कविप्रस्थानहेतवः ।
सुकुमारो विचित्रश्च मध्यमश्चोभयात्मकः ॥२४॥

तत्र तस्मिन् काव्ये मार्गाः पन्थानस्त्रयः[1] संभवन्ति । न द्वौ चत्वारः, स्वरादिसंख्यावत्तावतामेव वस्तुतस्तज्ज्ञैरुपलम्भात् । ते च कीदृशाः—कविप्रस्थानहेतवः । कवीनां प्रस्थानं प्रवर्तनं तस्य हेतवः, काव्यकरणस्य कारणभूताः । किमभिधानाः—सुकुमारो विचित्रश्च मध्यमश्चेति । कीदृशो मध्यमः—उभयात्मकः । उभयमनन्तरोक्तं मार्गद्वयमात्मा यस्येति विग्रहः । छायाद्वयोपजीवीत्युक्तं भवति । तेषां च स्वलक्षणावसरे स्वरूपमाख्यास्यते ।

अत्र च बहुविधा विप्रतिपत्तयः संभवन्ति । यस्माच्चिरन्तनैर्विदर्भादिदेशविशेषसमाश्रयणेन वैदर्भीप्रभृतयो रीतयस्तिस्रः समाम्नाताः[2] । तासां चोत्तमाधममध्यमत्ववैचित्र्येण त्रैविध्यम् । अन्यैश्च[3] वैदर्भगौडीयलक्षणं मार्गद्वितयमाख्यातम् । एतच्चोभयमप्ययुक्तियुक्तम् । यस्माद्देशभेदनिबन्धनत्वे रीतिभेदानां देशानामानन्त्यादसंख्यत्वं प्रसज्यते । न च विशिष्टरीतियुक्तत्वेन काव्यकरणं मातुलेयभगिनीविवाहवद् देशधर्मतया व्यवस्थापयितुं शक्यम् । देशधर्मो हि वृद्धव्यवहारपरंपरामात्रशरणः शक्यानुष्ठानतां नातिवर्तते । तथाविधकाव्यकरणं पुनः शक्त्यादिकारणकलापसाकल्यमपेक्ष्यमाणं न

---

(1) B adds सन्ति here.

(2) वामन i. 2. 9-13.

(3) दण्डी i. 42.

शक्यते यथाकथंचिदनुष्ठातुम् । न च दाक्षिणात्यगीतविषयसुस्वरतादि-ध्वनिरामणीयकवत्तस्य स्वाभाविकत्वं वक्तुं पार्यते । तस्मिन् सति तथाविधकाव्यकरणं सर्वस्य स्यात् । किंच शक्तौ विद्यमानाया-मपि व्युत्पत्त्यादिराहार्यकारणसम्पत्प्रतिनियतदेशविषयतया न व्यव-तिष्ठते, नियमनिबन्धनाभावात् तत्रादर्शनाद् अन्यत्र च दर्शनात् । न च रीतीनामुत्तमाधममध्यमत्वभेदेन त्रैविध्यं व्यवस्थापयितुं न्याय्यम् । यस्मात् सहृदयाह्लादकारिकाव्यलक्षणप्रस्तावे वैदर्भी-सदृशसौन्दर्यासंभवान्मध्यमाधमयोरुपदेशवैयर्थ्यमायाति । परिहार्यत्वे-नाप्युपदेशो न युक्ततामालम्बते, तैरेवानभ्युपगतत्वात् । न चागतिक-गतिन्यायेन यथाशक्ति दरिद्रदानादिवत् काव्यं करणीयतामर्हता-मर्हति । तदेवं निर्वचनसमाख्यामात्रकरणकारणत्वे देशविशेषाश्र-यणस्य वयं न विवदामहे । मार्गद्वितयवादिनामप्येतान्येव दूषणानि । तदलमनेन निःसारवस्तुपरिमलनव्यसनेन ।

कविस्वभावभेदनिबन्धनत्वेन काव्यप्रस्थानभेदः समञ्जसतां गाहते । सुकुमारस्वभावस्य कवेस्तथाविधैव सहजा शक्तिः समुद्भवति, शक्ति-शक्तिमतोरभेदात् । तया च तथाविधसौकुमार्यरमणीयां व्युत्पत्तिमा-बध्नाति । ताभ्यां च सुकुमारवर्त्मनाभ्यसतत्परः क्रियते । तथैव चैत-स्माद् विचित्रः स्वभावो यस्य कवे[1]स्तद्विदाह्लादकारिकाव्यलक्षण-करणप्रस्तावात् सौकुमार्यव्यतिरेकिणा वैचित्र्येण रमणीय एव, तस्य च काचिद्विचित्रैव तदनुरूपा शक्तिः समुल्लसति । तया च तथाविधवैदग्ध्य-बन्धुरां व्युत्पत्तिमावध्नाति । ताभ्यां च वैचित्र्यवासनाधिवासित-मानसो विचित्रवर्त्मनाभ्यासभाग् भवति । एवमेतदुभयकविनिबन्धन-संवलितस्वभावस्य कवेस्तदुचितैव शबलशोभातिशयशालिनी शक्तिः समुदेति । तया च तदुभयपरिस्पन्दसुन्दरव्युत्पत्त्युपार्जनमाचरति । ततस्तच्छायाद्वितयपरिपोषपेशलाभ्यासपरवशः संपद्यते ।

---

(1) B reads क only.

तदेवमेते कवयः सकलकाव्यकरणकलापकाष्ठाधिरूढिरमणीयं किमपि काव्यमारभन्ते, सुकुमारं विचित्रमुभयात्मकं च। त एव तत्प्रवर्तननिमित्तभूता मार्गा इत्युच्यन्ते। यद्यपि कविस्वभावभेदनिबन्धनत्वादनन्तभेदभिन्नत्वमनिवार्यं तथापि परिसंख्यातुमशक्यत्वात् सामान्येन त्रैविध्यमेवोपपद्यते। तथा च रमणीयकाव्यपरिग्रहप्रस्तावे स्वभावसुकुमारस्तावदेको राशिः, तद्व्यतिरिक्तस्यारमणीयस्यानुपादेयत्वात्। तद्व्यतिरेकी रमणीयकविशिष्टो विचित्र इत्युच्यते। तदेतयोर्द्वयोरपि रमणीयत्वादेतदीयच्छायाद्वितयोजीविनोऽस्य रमणीयत्वमेव न्यायोपपन्नं पर्यवस्यति। तस्मादेषां प्रत्येकमस्खलितस्वपरिस्पन्दमहिम्ना तद्विदाह्लादकारित्वपरिसमाप्तेर्न कस्यचिन्न्यूनता।

ननु च शक्त्योरान्तरतम्यात् स्वाभाविकत्वं वक्तुं युज्यते, व्युत्पत्त्यभ्यासयोः पुनराहार्ययोः कथमेतद् घटते? नैष दोषः, यस्मादास्तां तावत् काव्यकरणम्, विषयान्तरेऽपि सर्वस्य कस्यचिदनादिवासनाभ्यासाधिवासितचेतसः स्वभावानुसारिणावेव व्युत्पत्त्यभ्यासौ प्रवर्तेते। तौ च स्वभावाभिव्यञ्जनेनैव साफल्यं भजतः। स्वभावस्य तयोश्च परस्परमुपकार्योपकारकभावेनावस्थानात् स्वभावस्तावदारभते, तौ च तत्परिपोषमातनुतः। तथा चाचेतनानामपि भावः स्वभावसंवादिभावान्तरसंनिधानमाहात्म्यादभिव्यक्तिमासादयति, यथा चन्द्रकान्तमणयश्चन्द्रमसः करपरामर्शवशेन स्पन्दमानसहजरसप्रसराः संपद्यन्ते।

तदेवं मार्गानुद्दिश्य तानेव क्रमेण लक्षयति—

अम्लानप्रतिभोद्भिन्ननवशब्दार्थबन्धुरः।
अयत्नविहितस्वल्पमनोहारिविभूषणः ॥२५॥
भावस्वभावप्राधान्यन्यक्कृताहार्यकौशलः।
रसादिपरमार्थज्ञमनःसंवादसुन्दरः ॥२६॥

अविभावितसंस्थानरामणीयकरञ्जकः ।
विधिवैदग्ध्यनिष्पन्ननिर्माणातिशयोपमः ॥२७॥

यत् किंचनापि वैचित्र्यं[1] तत्सर्वं प्रतिभोद्भवम् ।
सौकुमार्यपरिस्पन्दस्यन्दि यत्र विराजते ॥२८॥

सुकुमाराभिधः सोऽयं येन सत्कवयो गताः ।
मार्गेणोत्फुल्लकुसुमकाननेनेव षट्पदाः ॥२९॥

सुकुमाराभिधः सोऽयम्, सोऽयं पूर्वोक्तलक्षणः सुकुमारशब्दाभिधानः । येन मार्गेण सत्कवयः कालिदासप्रभृतयो गताः प्रयाताः, तदाश्रयेण काव्यानि कृतवन्तः । कथम्—उत्फुल्लकुसुमकाननेनेव षट्पदाः । उत्फुल्लानि विकसितानि कुसुमानि पुष्पाणि यस्मिन् कानने वने तेन षट्पदा इव भ्रमरा यथा । विकसितकुसुमकाननसाम्येन तस्य कुसुमसौकुमार्यसदृशमाभिजात्यं द्योत्यते । तेषां च भ्रमरसादृश्येन कुसुममकरन्दकल्पसारसंग्रहव्यसनिता । स च कीदृशः—यत्र यस्मिन् किंचनापि कियन्मात्रमपि वैचित्र्यं विचित्रभावो वक्रोक्तियुक्तत्वम् । तत्सर्वमलंकारादिप्रतिभोद्भवं कविशक्तिसमुल्लसतिमेव, न पुनराहार्यं यथाकथंचित्प्रयत्नेन निष्पाद्यम् । कीदृशम्—सौकुमार्यपरिस्पन्दस्यन्दि । सौकुमार्यमाभिजात्यं तस्य परिस्पन्दस्तद्विदाह्लादकारित्वलक्षणं रामणीयकं तेन स्यन्दते रसमयं संपद्यते यत्तथोक्तम् । यत्र विराजते शोभातिशयं पुष्णातीति संबन्धः । यथा

प्रवृत्ततापो दिवसोऽतिमात्र-
मत्यर्थमेव क्षणदा च तन्वी ।

---

(1) The MS B. reads वैदग्ध्यं here ; but in the commentary the word वैचित्र्यं is explained.

उभौ विरोधक्रियया विभिन्नौ
जायापती सानुशयाविवास्ताम्[1] ।।७४।।

अत्र श्लेषच्छायाच्छुरितं कविशक्तिमात्रसमुल्लसितमलंकरणमनाहार्यं कामपि कमनीयतां पुष्णाति। तथा च 'प्रवृत्ततापः' 'तन्वी' इति वाचकौ सुन्दरस्वभावमात्रसमर्पणपरत्वेन वर्तमानावर्थान्तरप्रतीत्यनुरोधपरत्वेन प्रवृत्तिं न संमन्येते, कविव्यक्तकौशलमुल्लसितस्य पुनः प्रकारान्तरस्य प्रतीतावानुगुण्यमात्रेण तद्विदाह्लादकारितां प्रतिपद्येते। किं तत्प्रकारान्तरं नाम?—विरोधविभिन्नयोः शब्दयोरर्थान्तरप्रतीतिकारिणोरुपनिबन्धः। तथा चोपमेययोः सहानवस्थानलक्षणो विरोधः, स्वभावभेदलक्षणं च विभिन्नत्वम्। उपमानयोः पुनरीर्ष्याकलहलक्षणो विरोधः, कोपात् पृथगवस्थानलक्षणं विभिन्नत्वम्। 'अतिमात्रम्' 'अत्यर्थं' चेति विशेषणद्वितयं पक्षद्वयेऽपि सातिशयताप्रतीतिकारित्वेनातितरां रमणीयम्। श्लेषच्छायोत्क्लेशसंपाद्याप्ययत्नघटितत्वेनात्र मनोहारिणी।

पश्च कीदृशः—अम्लानप्रतिभोद्भिन्ननवशब्दार्थबन्धुरः। अम्लाना यासावदोषोपहता प्राक्तनाद्यतनसंस्कारपरिपाकप्रौढा प्रतिभा काचिदेव कविशक्तिः, तत उद्भिन्नौ नूतनाङ्कुरन्यायेन स्वयमेव समुल्लसितौ, न पुनः कदर्थनाकृष्टौ नवौ प्रत्यग्रौ तद्विदाह्लादकारित्वसामर्थ्ययुक्तौ शब्दार्थावभिधानाभिधेयौ ताभ्यां बन्धुरो हृदयहारी। अन्यच्च कीदृशः—अयत्नविहितस्वल्पमनोहारिविभुषणः। अयत्नेनाक्लेशेन विहितं कृतं यत् स्वल्पं मनाङ्मात्रं मनोहारि हृदयाह्लादकं विभूषणमलंकरणं यत्र स तथोक्तः। 'स्वल्प'-शब्दोऽत्र प्रकरणाद्यपेक्षः, न वाक्यमात्रपरः। उदाहरणं यथा—

बालेन्दुवक्राण्यविकाशभावाद्
बभुः पलाशान्यतिलोहितानि।

(1) रघु० xvi. 45.

सद्यो वसन्तेन समागतानां
नखक्षतानीव वनस्थलीनाम्[1] ।।७५।।

अत्र 'बालेन्दुवक्राणि' 'अतिलोहितानि' 'सद्यो वसन्तेन समागतानाम्' इति पदानि सौकुमार्यात् स्वभाववर्णनामात्रपरत्वेनोपात्तान्यपि 'नखक्षतानीव' इत्यलंकरणस्य मनोहारिणः क्लेशं विना स्वभावोद्भिन्नत्वेन योजनां भजमानानि चमत्कारितामापद्यन्ते ।

यश्चान्यच्च कीदृशः—भावस्वभावप्राधान्यन्यक्कृताहार्यकौशलः । भावाः पदार्थास्तेषां स्वभावस्तत्त्वं तस्य प्राधान्यं मुख्यभावस्तेन न्यक्कृतं तिरस्कृतमाहार्यं व्युत्पत्तिविहितं कौशलं नैपुण्यं यत्र स तथोक्तः । तदयमभिप्रायः—पदार्थपरमार्थमहिमैव कविशक्तिसमुन्मीलितः, तथाविधो यत्र विजृम्भते । येन विविधमपि व्युत्पत्तिविलसितं काव्यान्तरगतं तिरस्कारास्पदं संपद्यते । अत्रोदाहरणं रघुवंशे मृगयावर्णनपरं प्रकरणम्, यथा

तस्य स्तनप्रणयिभिर्मुहुरेणशावै-
र्व्याहन्यमानहरिणीगमनं पुरस्तात् ।
आविर्बभूव कुशगर्भमुखं मृगाणां
यूथं तदग्रसरगर्वितकृष्णसारम्[2] ।।७६।।

यथा च कुमारसम्भवे (३।३५)

द्वन्द्वानि भावं क्रियया विवव्रुः ।।७७।।

इतःपरं प्राणिधर्मवर्णनम्, यथा

शृङ्गेण च स्पर्शनिमीलिताक्षीं
मृगीमकण्डूयत कृष्णसारः[3] ।।७८।।

---

(1) कुमार० iii. 29. (2) रघु ix. 55. (3) कुमार० iii. 35.

अन्यच्च कीदृशः—रसादिपरमार्थज्ञमनःसंवादसुन्दरः। रसाः शृङ्गारादयः। तदादिग्रहणेन रत्यादयोऽपि गृह्यन्ते। तेषां परमार्थः परमरहस्यं तज्जानन्तीति तज्ज्ञास्तद्विदस्तेषां मनःसंवादो हृदयसंवेदनं स्वानुभवगोचरतया प्रतिभासः, तेन सुन्दरः सुकुमारः सहृदयहृदयाह्लादकारी वाक्यस्योपनिबन्ध इत्यर्थः। अत्रोदाहरणानि रघौ[1] रावणं निहत्य पुष्पकेनागच्छतो रामस्य सीतायास्तद्विरहविधुरहृदयेन मयास्मिन्नस्मिन् समुद्देशे किमप्येवंविधं वैशसमनुभूतमिति वर्णयतः सर्वाण्येव वाक्यानि। यथा

पुर्वानुभूतं स्मरता च रात्रौ[2]
कम्पोत्तरं भीरु तवोपगूढम्।
गुहाविसारीण्यतिवाहितानि
मया कथंचिद् घनगर्जितानि[3] ॥७९॥

अत्र राशिद्वयकरणस्यायमभिप्रायो यद् विभावादिरूपेण रसाङ्गभूताः शकुनिरुततरुसलिलकुसुमसमयप्रभृतयः पदार्थाः सातिशयस्वभाववर्णनप्राधान्येनैव रसाङ्गतां प्रतिपद्यन्ते। तद्व्यतिरिक्ताः सुरगन्धर्वप्रभृतयः सोत्कर्षचेतनायोगिनः शृङ्गारादिरसनिर्भरतया वर्ण्यमानाः सरसहृदयाह्लादकारितामायातीति कविभिरभ्युपगतम्। तथाविधमेव लक्ष्ये दृश्यते।

अन्यच्च कीदृशः—अविभावितसंस्थानरामणीयकरञ्जकः। अविभावितमनालोचितं संस्थानं संस्थितिर्यत्र तेन रामणीयकेन रमणीयत्वेन रञ्जकः सहृदयाह्लादकः। तेनायमर्थः—यदि तथाविधं कविकौशलमत्र संभवति तद् व्यपदेष्टुमियत्तया न कथंचिदपि पार्यते, केवलं सर्वातिशायितया चेतसि परिस्फुरति। यश्च कीदृशः—विधिवैदग्ध्यनिष्पन्ननिर्माणातिशयोपमः। विधिर्विधाता तस्य वैदग्ध्यं

(1) रघु० canto xiii. (2) The usual reading is स्मरता च यस्मिन्. (3) रघु० xiii. 28.

कौशलं तेन निष्पन्नः परिसमाप्तो योऽसौ निर्माणातिशयः सुन्दरः सर्गोल्लेखो रमणीयरमणीलावण्यादिः स उपमा निदर्शनं यस्य स तथोक्तः। तेन विधातुरिव कवेः कौशलं यत्र विवेक्तुमशक्यम्। यथा

ज्याबन्धनिष्पन्दभुजेन यस्य
विनिःश्वसद्वक्त्रपरंपरेण।
कारागृहे निर्जितवासवेन
दशाननेनोषितमा प्रसादात्[1] ॥८०॥

अत्र व्यपदेशप्रकारान्तरनिरपेक्षः कविशक्तिपरिणामः परं परिपाकमधिरूढः।

एतस्मिन् कुलके—प्रथमश्लोके प्राधान्येन शब्दालंकरणयोः सौन्दर्यं प्रतिपादितम्। द्वितीये वर्णनीयस्य वस्तुनः सौकुमार्यम्। तृतीये प्रकारान्तरनिरपेक्षस्य संनिवेशस्य सौकुमार्यम्। चतुर्थे वैचित्र्यमपि सौकुमार्याविसंवादि विधेयमित्युक्तम्। पञ्चमो विषयविषयिसौकुमार्यप्रतिपादनपरः।

एवं सुकुमाराभिधानस्य मार्गस्य लक्षणं विधाय तस्यैव गुणान् लक्षयति—

असमस्तमनोहारिपदविन्यासजीवितम्।
माधुर्यं सुकुमारस्य मार्गस्य प्रथमो गुणः ॥३०॥

असमस्तानि समासवर्जितानि मनोहारीणि हृदयाह्लादकानि श्रुतिरम्यत्वेनार्थरमणीयत्वेन च यानि पदानि सुप्तिङन्तानि तेषां विन्यासः संनिवेशवैचित्र्यं जीवितं सर्वस्वं यस्य तत्तथोक्तं माधुर्यं नाम सुकुमारलक्षणस्य मार्गस्य प्रथमः प्रधानभूतो गुणः। असमस्तशब्दोऽत्र प्राचुर्यार्थः, न समासाभावनियमार्थः। उदाहरणं यथा

(1) रघु० vi. 40.

क्रीडारसेन रहसि स्मितपूर्वमिन्दो-
र्लेखां विकृष्य विनिबध्य च मूर्ध्नि गौर्या ।
किं शोभिताहमनयेति शशाङ्कमौलेः
पृष्टस्य पातु परिचुम्बनमुत्तरं वः[1] ॥८१॥

अत्र पदानामसमस्तत्वं शब्दार्थरमणीयता विन्यासवैचित्र्यं च त्रितयमपि चकास्ति ।

तदेवं माधुर्यमभिधाय प्रसादमभिधत्ते—

अक्लेशव्यञ्जिताकूतं झगित्यर्थसमर्पणम् ।
रसवक्रोक्तिविषयं यत्प्रसादः स कथ्यते ॥ ३१ ॥

झगिति प्रथमतरमेवार्थसमर्पणं वस्तुप्रतिपादनम् । कीदृशम्— अक्लेशवञ्जिताकूतम् अकदर्थनाप्रकटिताभिप्रायम् । किंविषयम्— रसवक्रोक्तिविषयम् । रसाः शृङ्गारादयः, वक्रोक्तिः सकलालंकारसामान्यं विषयो गोचरो यस्य तत्तथोक्तम् । स एव प्रसादाख्यो गुणो कथ्यते भण्यते । अत्र पदानामसमस्तत्वं प्रसिद्धाभिधानत्वम् अव्यवहितसंबन्धत्वं समाससद्भावेऽपि गमकसमासयुक्तता च परमार्थः । 'आकूत'-शब्दस्तात्पर्यविच्छित्तौ च वर्तते । उदाहरणं यथा

हिमव्यपायाद्विशदाधराणा-
मापाण्डुरीभूतमुखच्छवीनाम् ।
स्वेदोद्गमः किंपुरुषाङ्गनानां
चक्रे पदं पत्रविशेषकेषु[2] ॥८२॥

अत्रासमस्तत्वादि[3]सामग्री विद्यते । यदपि विविधपत्रविशेषकवैचित्र्यविहितं किमपि वदनसौन्दर्यं मुक्ताकणाकारस्वेदलवोद्बृंहितं तदपि सुव्यक्तमेव । यथा वा

---

(1) The last two lines of this verse are quoted again below, ii. 84
(2) कुमार० iii. 33. (3) अत्र समत्वादि B.

अनेन सार्धं विहराम्बुराशे-
स्तीरेषु ताडीवनमर्मरेषु ।
द्वीपान्तरानीतलवङ्गपुष्पै-
रपाकृतस्वेदलवा मरुद्भिः[1] ।।८३।।

अलंकारव्यक्तिर्यथा

बालेन्दुवक्राणि[2] इति ।।८४।।

एवं प्रसादमभिधाय लावण्यं लक्षयति—

वर्णविन्यासविच्छित्तिपदसंधानसंपदा ।
स्वल्पया बन्धसौन्दर्यं लावण्यमभिधीयते ।।३२।।

बन्धो वाक्यविन्यासस्तस्य सौन्दर्यं रामणीयकं लावण्यमभिधीयते लावण्यमित्युच्यते । कीदृशम्—वर्णानामक्षराणां विन्यासो विचित्रं न्यसनं तस्य विच्छित्तिः शोभा वैदग्ध्यभङ्गी तया लक्षितं पदानां सुप्तिङन्तानां संधानं संयोजनं तस्य सम्पत्, सापि शोभैव, तया लक्षितम् । कीदृश्या—उभयरूपयापि स्वल्पया मनाङ्मात्रया नातिनिर्बन्धनिर्मितया । तदयमत्रार्थः—शब्दार्थसौकुमार्यसुभगः संनिवेशमहिमा लावण्याख्यो गुणः कथ्यते । यथा

स्नानार्द्रमुक्तेष्वनुधूपवासं
विन्यस्तसायन्तनमल्लिकेषु ।
कामो वसन्तात्ययमन्दवीर्य
केशेषु लेभे बलमङ्गनानाम्[3] ।।८५।

अत्र संन्निवेशसौन्दर्यमहिमा सहृदयसंवेद्यो न व्यपदेष्टुं पार्यते । यथा वा

---

(1) रघु० vi, 53. (2) Already quoted above p. 49. (3) रघु० xvi. 50; शार्ङ्गधरपद्धति no. 3289.

चकार बाणैरसुराङ्गनानां
गण्डस्थलीः प्रोषितपत्रलेखाः[1] ।।८६।।

अत्रापि वर्णविन्यासविच्छित्तिः पदसंधानसम्पच्च संनिवेशसौन्दर्यनिबन्धनस्फुटावभासैव ।

एवं लावण्यमभिधाय आभिजात्यमभिधत्ते—

श्रुतिपेशलताशालि सुस्पर्शमिव चेतसा ।
स्वभावमसृणच्छायमाभिजात्यं प्रचक्षते ।। ३३ ।।

एवंविधं वस्तु आभिजात्यं प्रचक्षते आभिजात्याभिधानं गुणं वर्णयन्ति । श्रुतिः श्रवणेन्द्रियं तत्र पेशलता रामणीयकं तेन शालते श्लाघते यत्तथोक्तम् । सुस्पर्शमिव चेतसा मनसा सुस्पर्शमिव । सुखेन स्पृश्यत इवेत्यतिशयोक्तिरियम् । यस्मादुभयमपि स्पर्शयोग्यत्वे सति सौकुमार्यात् किमपि चेतसि स्पर्शसुखमर्पयतीव । यतः स्वभावमसृणच्छायम् अहार्यश्लक्ष्णकान्ति यत्तद् आभिजात्यं कथयन्तीत्यर्थः । यथा

ज्योतिर्लेखावलयि गलितं यस्य बर्हं भवानी
पुत्रप्रीत्या कुवलयदलप्रापि कर्णे करोति[2] ।।८७।।

अत्र श्रुतिपेशलतादि स्वभावमसृणच्छायत्वं किमपि सहृदयसंवेद्यं परिस्फुरति ।

ननु च लावण्यमाभिजात्यं च लोकोत्तरतरुणीरूपलक्षणवस्तुधर्मतया यत् प्रसिद्धं तत् कथं काव्यस्य भवितुमर्हतीति चेत्तन्न । यस्मादनेन न्यायेन पूर्वप्रसिद्धयोरपि माधुर्यप्रसादयोः काव्यधर्मत्वं विघटते । माधुर्यं हि गुडादिमधुरद्रव्यधर्मतया प्रसिद्धं तथाविधाह्लादकारित्वसामान्योपचारात् काव्ये व्यपदिश्यते । तथैव च प्रसादः स्वच्छसलिलस्फटिकादिधर्मतया प्रसिद्धः स्फुटावभासित्वसामान्योपचाराज् झगिति-

(1) रघु० vi. 72. (2) मेघदूत 44.

प्रतीतिपेशलतां प्रतिपद्यते। तद्वदेव च काव्ये कविशक्तिकौशलोल्लिखितकान्तिकमनीयं बन्धसौन्दर्यं चेतनचमत्कारकारित्वसामान्योपचाराल्लावण्यशब्दव्यतिरेकेण शब्दान्तराभिधेयतां नोत्सहते। तथैव च काव्ये स्वभावमसृणच्छायत्वमाभिजात्यशब्देनाभिधीयते।

ननु च कैश्चित्प्रतीयमानं वस्तु ललनालावण्यसाम्याल्लावण्यमित्युत्पादितप्रतीति—

प्रतीयमानं पुनरन्यदेव
वस्त्वस्ति वाणीषु महाकवीनाम्।
यत्तत्प्रसिद्धावयवातिरिक्त-
माभाति लावण्यमिवाङ्गनासु[1] ॥८८॥'

तत्कथं बन्धसौन्दर्यमात्रं लावण्यमित्यभिधीयते? नैष दोषः, यस्मादनेन दृष्टान्तेन वाच्यवाचकलक्षणप्रसिद्धावयवव्यतिरिक्तत्वेनास्तित्वमात्रं साध्यते प्रतीयमानस्य, न पुनः सकललोकलोचनसंवेद्यस्य ललनालावण्यस्य। सहृदयहृदयानामेव संवेद्यं सत् प्रतीयमानं समीकर्तुं पार्यते। तस्य बन्धसौन्दर्यमेवाव्युत्पन्नपदपदार्थानामपि श्रवणमात्रेणैव हृदयहारित्वस्पर्धया व्यपदिश्यते। प्रतीयमानं पुनः काव्यपरमार्थज्ञानामेवानुभवगोचरतां प्रतिपद्यते। यथा कामिनीनां किमपि सौभाग्यं तदुपभोगोचितानां नायकानामेव संवेद्यतामर्हति, लावण्यं पुनस्तासामेव सत्कविगिरामिव सौन्दर्यं सकललोकगोचरतामायातीत्युक्तमेवेत्यलमतिप्रसङ्गेन।

एवं सुकुमारस्य लक्षणमभिधाय विचित्रं लक्षयति—

प्रतिभाप्रथमोद्भेदसमये यत्र वक्रता।
शब्दाभिधेययोरन्तः स्फुरतीव विभाव्यते॥ ३४॥

---

(1) ध्वन्यालोक i. 4.

अलंकारस्य कवयो यत्रालंकरणान्तरम् ।
असंतुष्टा निबध्नन्ति हारादेर्मणिबन्धवत् ॥३५॥

रत्नरश्मिच्छटोत्सेकभासुरैर्भूषणैर्यथा ।
कान्ताशरीरमाच्छाद्य भूषायै परिकल्प्यते ॥३६॥

यत्र तद्वदलंकारैर्भ्राजमानैर्निजात्मना ।
स्वशोभातिशयान्तःस्थमलंकार्यं प्रकाश्यते ॥३७॥

यदप्यनूतनोल्लेखं वस्तु यत्र तदप्यलम् ।
उक्तिवैचित्र्यमात्रेण काष्ठां कामपि नीयते ॥३८॥

यत्रान्यथाभवत् सर्वमन्यथैव यथारुचि ।
भाव्यते प्रतिभोल्लेखमहत्त्वेन महाकवेः ॥ ३९॥

प्रतीयमानता यत्र वाक्यार्थस्य निबध्यते ।
वाच्यवाचकवृत्तिभ्यां व्यतिरिक्तस्य कस्यचित् ॥ ४०॥

स्वभावः सरसाकूतो भावानां यत्र बध्यते ।
केनापि कमनीयेन वैचित्र्येणोपबृंहितः ॥४१॥

विचित्रो यत्र वक्रोक्तिवैचित्र्यं जीवितायते[1] ।
परिस्फुरति यस्यान्तः सा काप्यतिशयाभिधा ॥४२॥

सोऽतिदुःसंचरो येन विदग्धकवयो गताः ।
खड्गधारापथेनेव सुभटानां मनोरथाः ॥४३॥

---

(1) Jayaratha (p. 8) quotes this line in connexion with his exposition of the वक्रोक्तिजीवितकार's views.

स विचित्राभिधानः पन्थाः कीदृक्—अतिदुःसंचरः, यत्रातिदुःखेन संचरते। किं बहुना, येन विदग्धकवयः केचिदेव व्युत्पन्नाः केवलं गताः प्रयाताः, तदाश्रयेण काव्यानि चक्रुरित्यर्थः। कथम्—खड्ग-धारापथेनेव सुभटानां मनोरथाः। निस्त्रिंशधारामार्गेण यथा सुभटानां महावीराणां मनोरथाः संकल्पविशेषाः। तदयमत्राभिप्रायः—यदसि-धारामार्गगमने मनोरथानामौचित्यानुसारेण यथारुचि प्रवर्तमानानां मनाङ्मात्रमपि म्लानता न संभाव्यते। साक्षात्समरसंमर्दसमाचरणे पुनः कदाचित् किमपि म्लानत्वमपि संभाव्येत। तदनेन मार्गस्य दुर्गमत्वं तत्प्रस्थितानां च विहरणप्रौढिः प्रतिपाद्यते। कीदृक् स मार्गः—यत्र यस्मिन् शब्दाभिधेययोरभिधानाभिधीयमानयोरन्तः स्वरूपानुप्रवेशिनी वक्रता भणितिविच्छित्तिः स्फुरतीव प्रस्पन्दमानेव विभाव्यते लक्ष्यते। कदा—प्रतिभाप्रथमोद्भेदसमये। प्रतिभायाः कविशक्तेरचरमोल्लेखा-वसरे। तदयमत्र परमार्थः—यत् कविप्रयत्ननिरपेक्षयोरेव शब्दार्थयोः स्वाभाविकः कोऽपि वक्रताप्रकारः परिस्फुरन् परिदृश्यते। यथा

> कोऽयं भाति प्रकारस्तव पवन पदं लोकपादाहतीनां
> तेजस्विव्रातसेव्ये नभसि नयसि यत्पांसुपूरं प्रतिष्ठाम्।
> यस्मिन्नुत्थाप्यमाने जननयनपथोपद्रवस्तावदास्तां
> केनोपायेन सह्यो वपुषि कलुषतादोष एष त्वयैव[1] ॥८९॥

अत्राप्रस्तुतप्रशंसालक्षणोऽलंकारः प्राधान्येन वाक्यार्थः। प्रतीयमान-पदार्थान्तरत्वेन प्रयुक्तत्वात्तत्र विचित्रकविशक्तिसमुल्लिखितवक्र-शब्दार्थोपनिबन्धमाहात्म्यात् प्रतीयमानमप्यभिधेयतामिव प्रापितम्। प्रक्रम एव प्रतिभासमानत्वान्न चार्थान्तरप्रतीतिकारित्वेऽपि पदानां श्लेषव्यपदेशः शक्यते कर्तुम्, वाच्यस्य समप्रधानभावेनानवस्थानात्।

---

(1) सुभाषितावली no 1032 (भागवतामृतदत्तस्य).

अर्थान्तरप्रतीतिकारित्वं च प्रतीयमानार्थस्फुटत्वावभासनार्थमुपनिबध्यमानमतीवचमत्कारकारितां प्रतिपद्यते ।

तमेव विचित्रं प्रकारान्तरेण लक्षयति—अलंकारस्येत्यादि । यत्र यस्मिन्मार्गे कवयो निबध्नन्ति विरचयन्ति, अलंकारस्य विभूषणस्यालंकरणान्तरं विभूषणान्तरम् असंतुष्टाः सन्तः । कथम्—हारादेर्मणिबन्धवत् । मुक्ताकलापप्रभृतेर्यथा पदकादिमणिबन्धं रत्नविशेषविन्यासं वैकटिकाः । यथा

हे हेलाजितबोधिसत्त्व वचसां किं विस्तरैस्तोयधे
नास्ति त्वत्सदृशः परः परहिताधाने गृहीतव्रतः ।
तृष्यत्पान्थजनोपकारघटनावैमुख्यलब्धायशो-
भारप्रोद्वहने करोषि कृपया साहायकं यन्मरोः[1] ।।९०।।

अत्रात्यन्तगर्हणीयचरितं पदार्थान्तरं प्रतीयमानतया चेतसि निधाय तथाविधविलसितः सलिलनिधिर्वाच्यतयोपक्रान्तः । तदेतावदेवालंकृतेरप्रस्तुतप्रशंसायाः[2] स्वरूपम्—गर्हणीयप्रतीयमानपदार्थान्तरपर्यवसानमपि वाक्यं [व]स्तुन्युपक्रमरमणीयतयोपनिबध्यमानं तद्विदाह्लादकारितामायाति । तदेतद् व्याजस्तुतिप्रतिरूपकप्रायमलंकरणान्तरमप्रस्तुतप्रशंसाया भूषणत्वेनोपात्तम् । न चात्र संकरालंकारव्यवहारो भवितुमर्हति[3], पृथगतिपरिस्फुटत्वेनावभासनात् । न चापि संसृष्टिसंभवः समप्रधानभावेनानवस्थितेः । न च द्वयोरपि वाच्यालंकारत्वम्, विभिन्नविषयत्वात् । यथा वा

नामाप्यन्यतरोर्निमीलितमभूत्तत्तावदुन्मीलितं
प्रस्थाने स्खलतः स्ववर्त्मनि विधेरन्यद् गृहीतः करः ।

---

(1) Quoted anonymously in काव्यप्रकाश x, p. 671=पुञ्जराज on वाक्यपदीय (ii. 249)=Hemacandra (comm.), p. 28 (anon)=Ruyyaka p. 113. (2) ०प्रशंसयोः B. (3) ०मर्हतीति B.

लोकश्चायमदृष्टदर्शनकृता[1] दृग्वैशसादुद्धृतो
युक्तं काष्ठिक लूनवान् यदसि तामाम्रालिमाकालिकीम्[2] ॥९१॥

अत्रायमेव न्यायोऽनुसंधेयः। यथा च

किं तारुण्यतरोरियं रसभरोद्भिन्ना नवा वल्लरी
लीलाप्रोच्छलितस्य किं लहरिका लावण्यवारांनिधः ॥
उद्गाढोत्कलिकावतां स्वसमयोपन्यासविश्रम्भिणः
किं साक्षादुपदेशयष्टिरथवा देवस्य शृङ्गारिणः[3] ॥९२॥

अत्र रूपकलक्षणो योऽयं[4] वाक्यालंकारः तस्य सन्देहोक्तिरियं छायान्तरातिशयोत्पादनायोपनिबद्धा चेतनचमत्कारितामावहति। शिष्टं पूर्वोदाहरणद्वयोक्तमनुसर्तव्यम्।

अन्यच्च कीदृक्—रत्नेत्यादि। युगलकम्। यत्र यस्मिन्नलंकारैर्भ्राजमानैर्निजात्मना स्वजीवितेन भासमानैर्भूषायै परिकल्प्यते शोभायै भूष्यते। कथम्—यथा भूषणैः, कङ्कणादिभिः। कीदृशैः—रत्नरश्मिच्छटोत्सेकभासुरैः मणिमयूखोल्लासभ्राजिष्णुभिः। किं कृत्वा—कान्ताशरीरमाच्छाद्य कामिनीवपुः स्वप्रभाप्रसरतिरोहितं विधाय। भूषायै कल्प्यते तद्वदेवालंकरणैरुपमादिभिर्यत्र कल्प्यते। एतच्चैतेषां भूषायै कल्पनम्—यदेतैः स्वशोभातिशयान्तःस्थं निजकान्तिकमनीयान्तर्गतमलंकार्यम[5]लंकरणीयं प्रकाश्यते द्योत्यते। तदिदमत्र तात्पर्यम्—तदलंकारमहिमैव तथाविधो[6]ऽत्र भ्राजते, तस्यात्यन्तोद्रिक्तवृत्तेः स्वशोभातिशयान्तर्गतमलंकार्यं प्रकाश्यते[7]। यथा

---

(1) ०कृत्ता B. (2) ०माम्रालिकामालिकीम् B. भल्लटशतक 86= सुभाषितावली no. 1017. (3) सुभाषितावली 1471 (बन्धोः)=anonymous in Ruyyaka p. 43. (4) ०लक्षणयोरयं B. (5) The whole passage from प्रतिभासते on p. 43, line 1, up to this word (inclusive) is dropped entirely in A. The above text is given by B alone. (6) तादृशो A. (7) प्रकाशते B.

आर्यस्याजिमहोत्सवव्यतिकरे नासंविभक्तोऽत्र वः
कश्चित् काप्यवशिष्यते त्यजत रे नक्तञ्चराः संभ्रमम् ।
भूयिष्ठेष्वपि का भवत्सु[1] गणनात्यर्थं[2] किमुत्ताम्यते
तस्योदारभुजोष्मणोऽनवसिता नाचारसंपत्तयः ।।९३।।

it is not possible to follow his treatment properly or give consistent extracts. It is difficult to reconstruct the missing *kārikā*, but it may tentatively be put as follows :

विवक्षितपरिस्पन्दमनोहारित्वसिद्धये ।
वस्तुनः केनचित् साम्यं तदुत्कर्षवतोपमा ।।
तां साधारणधर्मोक्तौ वाक्यार्थे वा तदन्वयात् ।
इवादिरपि विच्छित्त्या यत्र वक्ति क्रियापदम् ।।

So much of the commentary as can be restored may be given here : इदानीं साम्यसमुद्भासिनो विभूषणवर्गस्य विन्यास-विच्छित्तिं विचारयति–विवक्षितेत्यादि । यत्र यस्यां वस्तुनः प्रस्ताव-वाधिकृतस्य केनचिदप्रस्तुतेन पदार्थान्तरेण साम्यं सादृश्यं सोपमा उपमालंकृतिरूपमित्युच्यते[1] । किमर्थमप्रस्तुतेन साम्यमित्याह—विव-क्षितपरिस्पन्दमनोहारित्वसिद्धये । विवक्षितो वक्तुमभिप्रेतो योऽसौ परिस्पन्दः कश्चिदेव धर्मविशेषस्तस्य मनोहारित्वं हृदयरञ्जकत्वं तस्य सिद्धिर्निष्पत्तिस्तदर्थम् । कीदृशेन पदार्थान्तरेण[2]—तदुत्कर्ष-वता । तदिति मनोहारित्वं परामृश्यते । तस्योत्कर्षं सातिशयत्वं नाम तदुत्कर्षः, स विद्यते यस्य स तथोक्तस्तेन तदुत्कर्षवता । तदिदमत्र तात्पर्यम्—वर्णनीयस्य विवक्षितधर्मसौन्दर्यसिद्ध्यर्थं प्रस्तुतपदार्थ-धर्मिणो[3] वा साम्यं युक्तियुक्ततामर्हति । धर्मेणेति नोक्तं केवलस्य तस्यासंभवात् । तदेवभयं धर्मद्वारको धर्मिणोरुपमानोपमेयलक्षणयोः फलतः साम्यसमुच्चयः पर्यवस्यति । अस्याम् (?) एवंविधामुपमां कः प्रतिपादयतीत्याह—क्रियापदमित्यादि[4] । क्रियापदं धात्वर्थः । वाच्यवाचकसामान्यमात्रमत्राभिप्रेतम् न पुनराख्यातपदमेव ।

(1) स्योपा० (for उपमा) in MS (2) कीदृशी नवव्यर्थान्तरेण in MS. (3) प्रस्तुतं in MS. (4) ०त्यादौ MS.

यस्मादमुख्यभावेनापि[1] यत्र क्रिया वर्तते तदप्युपमावाचकमेव।..... तदेवमुभयरूपमपि क्रियापरिस्पन्द(:)[2].....तामुपमां वक्त्यभिधत्ते। कथम्—विच्छित्त्या, वैदग्धचभङ्ग्या। विच्छित्तिविरहेणाभिधानेन तद्विदाह्लादकत्वं न संभवतीति भावः। तावत् क्रियापदं न केवलं तां[3] वक्ति यावद् इवादिः[4] इवप्रभृतिरपि। तत्समर्पणसामर्थ्यसमन्वितो यः कश्चिदेव शब्दविशेषः प्रत्ययोऽपि समासो बहुव्रीह्यादिः[5]..... विच्छित्त्या तां वक्तीत्यपिः समुच्चये। कस्मिन् सति—साधारण-धर्मोक्तौ। साधारणः समानो यो साध्योपमानोपमेययोरुभयोरनु-यायिनोः धर्मः[6].....। कुत्र[7]—वाक्यार्थे वा। परस्परान्वयसंबन्धेन पदसमूहो वाक्यं तदभिधेयं वस्तु विभूष्यत्वेन विषयगोचरं तस्याः[8]। कथम्—तदन्वयात्। तदिति पदार्थपरामर्शः। तेषां पदार्थानां समन्वयाद् अन्योन्यमभिसंबद्धत्वात्। वाक्ये बहवः पदार्थाः संभवन्ति, तत्र परस्पराभिसंबन्धमाहात्म्यात्।

Then he goes on to distinguish the sphere of this figure from that of *utprekṣā* by a half-*kārikā* as follows : तदेवं तुल्येऽस्मिन् वस्तुसाम्ये सत्युपमोत्प्रेक्षावस्तुनोः पृथक्त्वम् इत्याह—

उत्प्रेक्षावस्तुसाम्येऽपि तात्पर्यगोचरो मतः।

The phrase तात्पर्यगोचरो (which alone can be

---

(1) ०भावो नापि MS. (2) The text is corrupt here and reads क्रियापरिस्पन्दस्पन्दीवदतामुपमां etc. (3) केवलतां MS. (4) याव-देवादिः MS. (5) The text is corrupt here. The whole passage from तदेवमुभयरूपमपि (l. 2) to साध्योपमानोपमेययोः (l. 8) is repeated in the MS, and neither the text is consistent nor correct. (6) The text reads उभयोरनुयायिनः धर्मान्वययोः क्रिययोः कर्तृभेदेन सुवन्तस्योपमा. (7) ततः in MS. (8) विषयोगोचरः परस्तस्याः in MS.

rescued from the corroupt text) is explained as तात्पर्यं पदार्थव्यतिरिक्तवृत्ति वाक्यार्थजीवितभूतं वस्त्वन्तरमेव गोचरो विषयस्तद्विदामन्तःप्रतिभासः[यस्य] । As an instance of उपमा due to अमुख्यक्रियापदपदार्थ, the following verse is given :

पूर्णेन्दोस्तव[1] संवाद्धि वदनं वनजेक्षणे ।
पुष्णाति पुष्पचापस्य जगत्रयजिगीषुताम् ।।

Then, इवादिप्रतिपाद्यपदार्थोपमोदाहरणम् । यथा

निपीयमानस्तबका शिलीमुखैः । (already cited p. 73)

इत्यादि । आख्यातपदप्रतिपाद्यपदार्थोपमोदाहरणम् यथा

ततोऽरुणपरिस्पन्द (already cited p. 11)

इत्यादि । तथाविधत्वाद्वाक्योपमोदाहरणम्, यथा

मुखेन सा केतकपत्रपाण्डुना कृशाङ्गयष्टिः परिमेयभूषणा ।
स्थिताल्पतारां तरुणीन्दुमण्डलां विभातकल्पां रजनीं व्यडम्बत्[2] ।।

इत्यादि । अप्रतिपाद्यपदार्थोदाहरणम्, यथा

चुम्बन्कपोलतलमुत्पलकं प्रियाया·
स्पर्शोल्लसन्नयनमामुकुलीचकार ।
आविर्भवन्मधुरनिद्रमिवारविन्द-
(मित्रस्पृशास्त)[3]मितमुत्पलमुत्पलिन्याः ।।

तथाविधवाक्योपमोदाहरणम्, यथा

पाण्ड्योऽमंसार्पितलम्बहारः[4] etc.

After discussing these examples the author says : आदि-ग्रहणाद् इवादिव्यतिरिक्तेनापि तथादिशब्दोत्तरेणोपमाप्रतीति-

---

(1) पूर्णदो० MS. (2) विडम्बयत् in MS. (3) मिन्दस्पस्त MS. Our emendation is conjectual. Or is it ०भिन्दुः स्पृशन् स्तिमित ? (4) *Raghu*° vi. 60.

भवतीति. The following is probably an example of the figure *upamā* involving *samāsa* :

पूर्णेन्दुकान्तिवदना नीलोत्पलविलोचना ।

Then the verse यान्त्या मुहुर्बलितकन्धरमानन from *Mālatī-mādhava* i. 28, माञ्जिष्ठीकृतपट्टसूत्रसदृशः from *Bāla-rāmāyaṇa* iii. 10, रामेण मुग्धमनसा वृषभध्वजस्य from *Bāla-rāmayaṇa* iii. 80, and महीभृतः पुत्रवतोऽपि दृष्टिः from *Kumāra°* i. 27 are cited. In the last of these verses Kuntaka admits that there is अर्थान्तरन्यासभ्रान्ति. There are two other verses, इत्याकर्णितकालनेमिवच(नो) and इतीदमाकर्ण्य तपस्विकन्या, which cannot be restored.

The figure *prativastūpamā.*

Kuntaka considers the question as to whether it is necessary to regard प्रतिवस्तूपमा as a separate figure or include it in *upamā* : समासवस्तुन्यासोपनिबन्धनं प्रतिवस्तूपमापि न पृथग् वक्तव्यतामर्हति, पूर्वोदाहरणेनैव समानयोगक्षेमत्वात. Then citing Bhāmaha's definition and example of *prativastūpamā* (ii. 34 and 36 respectively), he remarks :

कियन्तः सन्ति गुणिनः साधुसाधारणप्रियाः ।
स्वादुचारुफला नम्राः कियन्तो वाध्वशाखिनः ॥[1]

अत्र समानविलासितानामुभयेषामपि कविविचक्षितविरलत्व-लक्षणसाम्यव्यतिरेक[न] किंचिदन्यत् मनोहारि जीवितमतिरिच्य-मानमुपलभ्यते ।

Kuntaka, however, would in the same way regard उपमेयोपमा and तुल्ययोगिता as figures not separate

(1) Bhāmaha ii. 36.

but included in *upamā*. He proceeds : तदेवं प्रतिवस्तूपमायाः प्रतीयमानोपमायामन्तर्भावोपपत्त्यौ सत्यामिदानीमुपमेयोपमादेरुपमायामन्तर्भावो विचार्यते. He says[1] that *upameyopamā* is nothing different (सामान्या, न व्यतिरिक्ता) from *upamā*, on the ground लक्षणानन्यथास्थितेः (explained as तत्स्वरूपाभिधानं लक्षणं, तस्यानन्यथास्थितेः अतिरिक्तभावेन नावस्थानात्), for here only the उपमेय and उपमान become respectively उपमान and उपमेय. Similar remarks, he says, apply to *tulyayogitā* (सा भवत्युपमितिः स्फुटम्[2]), because of the साम्यातिरेक between the two objects, each of which is मुख्यतया वर्णनीयं वस्तु. The examples given of *tulyayogitā* are जनस्य साकेतनिवासिनस्तौ from *Raghu°* v. 31 and उभौ यदि व्योम्नि from *Śiśu°* iii. 8. In the same way, Kuntaka thinks that the *ananvaya*, in which there is a काल्पनिक उपमान, does not require a separate definition. The verse cited as an illustration of the figure is corrupt in the MS, but may be restored as follows :

The figure *upameyopamā ananvaya* and *tulyayogitā*.

तत्पूर्वानुभवे भवन्ति लघवो भावाः शशाङ्कादय-
स्तद्वक्त्रोपमितेः परं परिणमेच्चेतो रसायाम्बुजात्[3] ।।
एवं निश्चिनुते मनस्तव मुखं सौन्दर्यसारावधि
बध्ना[ति] व्यवसायमेतुमुपमोत्कर्षं[4] स्वकान्त्या[5] स्वयम् ।।

(1) The Kārikās on these two figures we have not been able to restore from the वृत्ति. (2) This appears to be a fragment of the missing Kārikā. (3) चेतारसाभूभवत् MS (4) ०मुपमाकर्षा MS. (5) स्वकान्तैः MS.

On this Kuntaka remarks : तदेवमभिधावचित्र्यप्रकाराणामेवंविधं वैश्वरुप्यम्, न पुनर्लक्षणभेदानाम् । In this connexion he quotes Bhāmaha's definition and illustration of *tulyayogitā* (iii. 26, 27). It is noteworthy that the verse शेषो हिमगिरिस्त्वं च, which Bhāmaha gives as an illustration of the figure and which Kuntaka criticises, is also quoted in *Dhvanyāloka* iv. 4 (p. 236). Kuntaka explains that with Bhāmaha's definition also, the *tulyayogitā* falls within the province of *upamā* (उक्तलक्षणे तावदुपमान्तर्भावस्तुल्ययोगितायाः).

The figure *nidarśana*, in Kuntaka's opinion, may similarly be included in *upamā* : निदर्शनमप्येवंप्रायमेव. He quotes and discusses an instance of it running as follows :

The figure *nidarśana*.

यैर्वा दृष्टा न वा दृष्टा[1] मुषिताः सममेव ते ।
हृतं हृदयमेतेषामन्येषां चक्षुषः फलम् ॥[2]

He also quotes only two lines of a *śloka*

यत्काव्यार्थनिरूपणं प्रियकथालापा रहोऽवस्थितिः ।
कण्ठान्तं मृदुगीतमादृतसुहृद्दुःखान्तरावेदनम्[3] ।

---

(1) The reading here is corrupt in MS. (2) सुभाषितावलि 1254 (शुक्रदेवस्य) = शार्ङ्गधरपद्धति 3368 (प्रभाकरदेवस्य) = सूक्तिसुक्तावलि p. 65b (प्रभाकरदेवस्य) = सदुक्तिकर्णामृत ii. 494 (कस्यचित्) = Hemacandra, वृत्ति p. 256 (anon) = कवीन्द्रवचन० 248 (anon). (3) ०वेघनम् MS.

as well as Bhāmaha's definition and illustration (ताम्बूलरागवलयं) of *ananvaya*, iii. 44-45. The comment which follows is corrupt and difficult to reconstruct. Then comes the quotation तद्वल्गुना युलपदुन्यिषितेन तावत् from *Raghu°* v. 68, and another corrupt verse. beginning with हेलावभग्नहरकामुक एष सोऽपि, probably from some lost Rāma-drama.

The figure *parivṛtti*.

Taking up the figure *parivṛtti* after this, Kuntaka says: परिवत्तिरप्यनेन न्यायेन पृथङ् नास्तीति निरूप्यते. In his opinion, it is, like the figures discussed above, nothing more than a variety of *upamā* ; because in it the two objects are each described principally and the साम्यप्रतीति is clear. The missing *kārikā* on this and its *vṛtti*, reconstructed, would run thus :

विनिवर्तनमेकस्य यत्तदन्यस्य वर्तनम् ।
न परिवर्तमानत्वादुभयोरत्र(?) पूर्ववत् ।।

तदेवं परिवृत्तेरलंकरणत्वमयुक्तमित्याह—विनिवर्तनमित्यादि । यदेकस्य पदार्थस्य विनिवर्तनम् अकारणं (अपसारणं ?) तदन्यस्य तद्व्यतिरिक्तस्य परस्य वर्तनं तदुपनिबन्धनम् । तदलंकरणं न भवति । कस्मात्—उभयोः परिवर्तमानत्वात् मुख्येनाभिधीयमानत्वात् । कथम् —पूर्ववत्, यथापूर्वम् । प्रत्येकं प्राधान्यान्नियमानिश्चितेश्च न क्वचित् कस्यचिदलंकरणम् । तद्वदिहापि न च तावन्मात्ररूपतया तयोः परस्परविभूषणभावः, प्राधान्ये निर्वर्तनप्रसङ्गात् । रूपान्तरनिरोधेषु पुनः साम्यसद्भावे भवत्युपमितिरेषा चालंकृतिः समुचिता । उपमा पूर्ववदेव । यथा—

सदयं[1] (बु)भुजे महीभुजः
सहसोद्वेगमियं व्रजेदिति।
अचिरोपनतां[2] स मेदिनीं
नवपाणिग्रहणां वधूमिव[3] ।।

He distinguishes several kinds of *parivṛtti*, e.g. the kinds in which there is विषयान्तरपरिवर्तन or in which there is धर्मान्तरपरिवर्तन. Of the first variety, the illustration is

स्वल्पं जल्प बृहस्पते सुरगुरो नैषा सभा वज्रिणः ।

and *Kumāra*° v. 11 (विसृष्टरागादधरान्निवर्तितः) is cited as an example of the second variety. On this verse Kuntaka remarks : अत्र गौर्याः करकमल-लक्षणो धर्मः परिवर्तितः । and then goes on : क्वचिदेकस्यैव धर्मिणः समुचितस्वसंवेदिधर्मावकाशे धर्मान्तरं परिवर्तते । [यथा— धृतं] त्वया वार्द्धकशोभि वल्कलम् (*Kumāra*° v. 44) । क्वचिद् बहूनामपि धर्मिणां परिस्पर्धिनां पूर्वोक्ताः सर्वे विपरिवर्तन्ते । तथा च लक्षणकारेणा[4]त्रवोदाहरणं दर्शितम्, यथा

(शस्त्र)प्रहारं ददता भुजेन तव भुभुज(ाम्) ।
चिरार्जितं हृतं तेषां यशः कुमुदपाण्डुरम् ।।

Kuntaka quotes *Raghu*° i. 95 (निर्दिष्टां कुलपतिना) and discusses whether this is a case where the परिवर्तनीय पदार्थान्तर is प्रतीयमान ।

---

(1) सेदय MS. (2) अभिरोपमतां MS. (3) *Raghu* viii. 7. (4) Kuntaka means Daṇḍin whom he quotes. Daṇḍin ii. 356.

From this point, the MS is hopelessly corrupt, and no consistent or intelligible account can be given of Kuntaka's concluding remarks on this subject. He appears, however, to quote and discuss Bhāmaha's definition and illustration (iii. 32, 33 अयं मन्दद्युतिर्भास्वान्) of the figure *nidarśana* ; and apparently this is taken up by the rest of the *vṛtti* on this topic. In the course of the discussion, *Raghu*° iv. 66 (ततः प्रतस्थे कौबेरीं) and *Kirāta*° iii. 25 (निर्याय विद्याथ) are quoted.

The figure *śleṣa.*

It is a matter of great regret that Kuntaka's treatment of an important figure like *śleṣa*, which is next taken up, cannot be reconstructed from the MS, nor can even a cursory account of it given : for the MS is very corrupt, fragmentary and entirely unintelligible here. It appears, however, that Kuntaka classifies *śleṣa* into three varieties, although the exact nomenclature or characteristics of the three varieties are not clear. He probably follows Udbhaṭa in accepting *śleṣa* as relating to *artha*. *śabda* or *śabdārtha*, and this may be the basis of his classification. Of the first variety the illustration given is

स्वाभिप्रायसमर्पणप्रवणया माधुर्यमुद्राङ्कया[1]

(1) मुद्राज्ञता MS (but marked in transcript as corrupt)

विच्छित्त्या हृदयेऽभिजातमनसामन्तः किमप्युल्लिखत्[1] ।
आरूढं रसवासनापरिणते[:] काष्ठां[2] कवीनां परं[3]
कान्तानां च विलोकितं विजयते वैदग्ध्यवक्रं वचः ।।

The example of the second variety is the very well-known verse येन ध्वस्तमनोभवेन बलिजित्कायः quoted by mose Ālaṃkārikas from Ānandavardhana (p. 95) downwards[4]. It is regrettable that the apparently fine verse, which is given as an example of the third variety, is corrupt in the MS and cannot be reconstructed satisfactorily as the last line is defective. It may be given thus :.

मालामुत्पलकन्दलैः प्रतिकचं खायोजितां[5] बिभ्रती
नेत्रेणासमदृष्टिपातसुभगेनोद्दीपयन्ती स्मरम् ।
काञ्चीदामनिबद्धभङ्गि[6] दधती व्यालम्बिना वाससा
मूर्तिः कामरिपोः सिताम्बरधरा पायाच्च कामस्त्रियः[7] ।।

After this, the verse दृष्ट्या केशव गोपरागहृतया (already

---

(1) किमप्युल्लिखन MS. (2) काष्ठा MS. (3) तरं MS. (4) काव्यमीमांसा p. 88 = व्यक्तिविवेक p. 94 = काव्यप्रकाश p. 419 = रुय्यक p. 96 = हेमचन्द्र p. 159 = विश्वनाथ p 461 = सुभाषितावलि 44 (anon). Jhalakikara in his commentary on काव्यप्रकाश attributes it to Candraka. (5) प्रतिकचोरायोजितां MS. (6) The syllables are marked as corrupt in the MS and read राङ्ग. In the case of रति, construe as निबद्धभङ्गि काञ्चीदाम दधती ; in the other ease, काञ्चीदामनिबद्धभङ्गि व्यालं दधती. Again, construe in the one case as व्यालम्बिना ; in the other, व्यालं बिना. (7) This line is extremely corrupt after कामरिपोः and reads सिताश्वकधरा पायावागजगं. In the case of कामरिपोः मूर्ति it should be split up as सिता and अम्बरधरा.

cited in *Dhvanyāloka* p. 98)[1] is quoted as an example of असत्यभूतश्लेष, although the exact signification of the term cannot be determined from the MS.

The figure *vyatireka*.

Kuntaka then passes on to the figure *vyatireka*, the *kārikā* on which may be conjecturally reconstructed thus :

सति तच्छब्दवाच्यत्वे धर्मसाम्येऽन्यथास्थितेः ।
व्यतिरेचनमन्यस्मात् प्रस्तुतोत्कर्षसिद्धये ।।
शाब्दः प्रतीयमानो वा व्यतिरेकोऽभिधीयते ।।

The comment on this runs thus : एवं श्लेषमभिधाय साम्यकनिबन्धनत्वाद् उक्तरूप[2]श्लेषकारणं व्यतिरेकमभिधत्ते—सतीत्यादि । तच्छब्दवाच्यत्वे, स चासौ शब्दश्चेति विगृह्य । तच्छब्दशक्त्या श्लेषनिमित्तभूतः शब्दः परामृश्यते । तस्य वाच्यत्वेऽभिधेयत्वे सति विद्यमाने । धर्मसाम्ये सत्यपि परस्परस्पन्दसादृश्ये[3] विद्यमाने.....[4]तथाविधशब्दवाच्यत्वस्य धर्मसाम्यस्य चोभयनिष्ठत्वादुभययोः प्रकृतत्वात् प्रस्तुताप्रस्तुतयोरेव तयोर्धर्माद् एकस्य यथारुचि केनापि[5] विवक्षि(तपदार्थान्ति)रेण अन्यथास्थितेरतथाभावेनावस्थितेः[6] (?) व्यतिरेचनं पृथक्करणम् । अन्यस्माद् उपमेयस्योपमानादुपमानस्य[7] वा तस्मात् । स व्यतिरेकनामालंकारोऽभिधीयते कथ्यते । किमर्थम्—प्रस्तुतोत्कर्षसिद्धये[8] । प्रस्तुतस्य वर्ण्यमानस्य वृत्तेश्छायातिशयनिष्पत्तये । स च द्विविधः संभवति—शाब्दः प्रतीयमानो वा । शाब्दः कविप्रवाहप्रसिद्धः तत्समर्पणसमर्थो[9]-

---

(1) Also quoted by विश्वनाथ p. 234. Possibly असत्यभूत श्लेष is in the word गोपरागः for गोः परागः is not a matter of fact but imagined. (2) उपरूपक MS. (3) ०सादृश्याद् MS. (4) A *lacuna* is marked here. (5) यथारुचकेनापि MS. (6) ०नावस्थिता MS. (7) ०दुपमानं MS. (8) ०त्कर्षप्रसिद्धयोः MS. (9) ०समर्षा MS.

भिधानेना[भि]धीयमानः। प्रतीयमानो वाक्यार्थसामर्थ्यमात्राव-बोध्यः।

Of the three illustrative verses (one Prakrit and two Sanskrit), unfortunately two are too corrupt and fragmentary to be given here. The third, which also is fragmentary in our MS, appears to be the same as the verse प्राप्तश्रीरेष कस्मात् cited in *Dhvanyāloka* p. 109. In his comment on the last of these verses which Kuntaka regards apparently as प्रतीयमानव्यतिरेक but which earlier writers would regard as *pratīyamāna rūpaka* (तत्त्वाध्यारोपणात् प्रतीयमानतया रूपकमेव पूर्वसूरिभिराम्नातम्), Kuntaka cites *Dhvanyāloka* i. 13 (the Dhvanikāra's definition of *dhvani-kāvya*) and discusses the meaning of प्रतीयमानता in this connexion. This is followed by an example of श्लेषव्यतिरेक, illustrated by the verse श्लाघ्याशेषतनुं सुदर्शनकरः (*Dhanyāloka*, p. 96).

A third variety of *vyatireka* is mentioned, of which the missing *kārika* would probably read as follows :

लोकप्रसिद्धसामान्यपरिस्पन्दाद्विशेषतः।
व्यतिरेको यदेकस्य स परस्तद्विवक्षया॥

The commetary explains : अस्यैव प्रकारान्तरमाह—लोकप्रसिद्धेत्यादि। परोऽन्यः स[1] व्यतिरेकालंकारः। कीदृशः—यदेकस्य वस्तुनः कस्या[पि] व्यतिरेकः पृथक्करणम्। कस्मात्[2]—लोकप्रसिद्धसामान्यपरिस्पन्दात्। लोकप्रसिद्धो जगत्प्रतीतः समान्यभूतः सर्वसाधारणो यः परिस्पन्दो व्यापारस्तस्मात्। कुतो हेतोः—

(1) परेन्याय MS. (2) यस्मात् MS.

विशेषतः, कुतश्चिदतिशयात्। कथम्—तद्विवक्षया[1]। 'तद्' इत्यु-इत्युपमादीनां परमार्थस्तेषां विवक्षया। तद्विवक्षितत्वेन[2] विहितः।

The illustration given of this variety is unfortunately fragmentary :

चापं पुष्पितभू(तलं सुरचिता) मौर्वी द्विरेफावलिः
पूर्णेन्दोरुदयोऽभियोग[3]समयः पुष्पाकरोऽप्यासरः[4]।
शस्त्राण्युत्पलकेतकीसुमनसो योग्यात्मनः कामिनां
त्रैलोक्ये (मदनस्य सापि ल)लितोल्लेखा जिगीषाग्रहः॥

अत्र सकललोकप्रसिद्धशस्त्राद्युपकरणकलापाच्च जिगीषाव्यवहारान्मन्मथः सुकुमारोपकरणत्वाज्जिगीषा……। ननु च भूतलादीनां चापादिरूपणाद्रूपकव्यतिरेक[5] एवायम्। नैतदस्ति। रूपकव्यतिरेके हि रूपणं विधाय तस्मादेव व्यतिरेचनं विधीयते। एतस्मिन् पुनः सकललोकप्रसिद्धात्सामान्यव्य[हार] तात्पर्या[द्] व्यतिरेचनम्। भूतलादीनां चापादि[6]रूपणं विशेषान्तरनिमित्तमात्रमवधार्यताम्।

After dealing with the figure *virodha*[7] which, in his opinion, generally involves *śleṣa* (श्लेषेणाभिसंभिन्नत्वात्), Kuntaka passes on to the figure *samāsokti*, which he refuses to accept as an independent figure, as it lacks the requisite

The figure *samāsokti*.

(1) तद्विवक्षायां MS. (2) तान्यविवक्षित्वायो MS. (3) ०रुदयाभियोग MS. (4) The word आसरः may be interpreted as आ समन्तात् सरति यः सः, meaning something like अग्रेसरः ; for वसन्त is often described as such in relation to मदन ; but it is probable that the author meant आसार (=सुहृद्बल), metrically shortened. (5) रूपकाद्व्यतिरेक MS. (6) भाषादि MS. (7) The Kārikā on this figure as well as on Samāsokti is difficult to reconstruct from the corrupt Vṛtti on this topic.

charm of a poetic figure (अलंकारान्तरत्वेन शोभाशन्यतया). In this connexion he discusses Bhāmaha's definition and illustration (ii. 79-80) of this figure, citing Bhāmaha's illustrative verse

स्कन्धवानृजुरव्यालः स्थिरोऽनेकमहाफलः ।
जातस्तरुरयं चोच्चैः पातितश्च नभस्वता[1] ।।

Kuntaka remarks : अत्र तरोर्महापुरुषस्य च द्वयोरपि[2] मुख्यत्वे महापुरुषपक्षे विशेषणानि सन्तीति विशेष्यविधायकं पदान्तरमभिधातव्यम् । यदि[3] वा विशेषणेऽन्यथानुपपत्त्या प्रतीयमानतया विशेष्यं परिकल्प्यते तदैवंविधस्य कल्पनस्य स्फुरितं न किंचिदिति स्फुटमेव शोभाशून्यता. Kuntaka then quotes and discusses the well known verse अनुरागवती सन्ध्या (already quoted in *Dhvanyāloka* p. 37) which, in the opinion of Bhāmaha,[4] contains the figure *samāsokti.*

Passing on to the figure *sahokti,* Kuntaka cites, discusses and rejects Bhāmaha's definition and illustration (iii. 38, 39) of that figure. He considers the figure in Bhāmaha's illustrative verse हिमपालाविलदिशः to be nothing more than *upamā* (अत्र परस्परसाम्यसमन्वयो मनोहारनिबन्धनमिष्युपमैव). He defines *sahokti* as follows (the *kārikā* conjecturally reconstructed) :

The figure *sahokti.*

(1) This verse is quoted in a very corrupt form in the MS. (2) बन्धयोरपि MS. (3) यथा MS. (4) See Abhinavagupta's remarks on this verse in *Locana,* at p. 37 ; but there is nothing in the text of Bhāmaha regarding this verse.

यत्रैकेनैव वाक्येन वर्णनीयार्थसिद्धये ।
उक्तिर्युगपदार्थानां सा सहोक्तिः सतां मता ।।

This is explained thus : प्रमाणोपपन्नमभिधत्ते तत्र सहोक्तेस्तावत्[1]—यत्रेत्यादि । सा सहोक्तिरलंकृतिर्मता प्रतिभाता सतां तद्विदां समाम्नातेत्यर्थः[2] । कीदृशी—यत्र यस्याम् एकेनैव वाक्येनाभिन्नेनैव पदसमहेन[3] अर्थानां वाक्यार्थतात्पर्यभूतानां वस्तूनां युगपत्तुल्यकालमुक्तिरभिहितिः[4] ।• किमर्थम्—वर्णनीयार्थसिद्धये । वर्णनीयस्य प्रधानत्वेन विवक्षितस्यार्थस्य वस्तुनः संपत्तये[5] । तदिदमुक्तं भवति—यत्र वाक्यान्तरवक्तव्यमपि वस्तु प्रस्तुतार्थनिष्पत्तये विच्छित्त्या तेनैव वाक्येनाभिधीयते । यथा—

हे हस्त दक्षिण मृतस्य शिशोर्द्विजस्य
जीवातवे विसृज शूद्रमुनौ कृपाणम् ।
रामस्य पाणिरसि निर्भरगर्भखिन्न-
देवीप्रवासनपटोः करुणा कुतस्ते ।।[6]

The other three examples of this figure given by Kuntaka are *Kirata*° ix.39-40 (उच्यतां स वचनीयमशेषं and किं गतेन न हि युक्तमुपतुम्) and

सर्वक्षितिभृतां नाथ दृष्टा सर्वाङ्गसुन्दरी ।
रामा रम्ये वनोद्देशे मया विरहिता त्वया ।।[7]

On this last verse, the comment is : अत्र प्रधानभूतविप्रलम्भशृङ्गाररसपरिपोषण(सिद्ध)ये वाक्यार्थद्वयमुपनिबद्धम् ।

---

(1) महोकेस्तावत् MS. (2) समानमित्यर्थः MS. (3) तद० MS. (4) ०मुक्तिभिरभिहितः MS. (5) संपन्नम् MS. (6) *Uttara-rāma-carita* 2. 10. (7) *Vikramorvaśīya* iv. 51.

Kuntaka then raises the question, viz. that if in *sahokti* more than one sense is involved, why should not there be श्लेषानुप्रवेशः in such cases ? This portion of the *vṛtti* is unfortunately corrupt, but the general sense is pretty clear :

ननु चानेकार्थसंभवेऽत्र श्लेषानुप्रवेशः कथं न संभवतीत्यभिधीयते —तत्र यस्माद् द्वयोरेकतरस्य वा मुख्यभावे श्लेषे.....[1] तस्मिन् पुनस्तथाविधभावात्। बहूनां द्वयोर्वा सर्वेषामेव गुणभावः प्रधानार्थ-परत्वेनावसानात्। अन्यच्च, तस्मिन्नेकेनैव[2] शब्देन युगपत्प्रदीप-प्रकाशवदर्थद्वयप्रकाशनं शब्दार्थद्वयप्रकाशनं वेति शब्दस्तत्र सामान्याय[3] विजृम्भते। सहोक्तेः पुनस्तथाविधस्वाङ्गाभावादेकेनैव वाक्येन पुनः पुनरावर्तमानतया वस्त्वन्तरप्रकाशनं विधीयते। तस्मादावृत्तिरत्र शब्दन्याय्यतां प्रतिपद्यते। 'सर्वक्षितिभृतां नाथ' इत्यत्र वाक्यैकदेशे श्लेषानुप्रवेशः संभवतीत्युच्यते—.....[4]। अत्र वाक्यैकदेशे श्लेष-स्याङ्गत्वम्, मुख्यभावः पुनः सहो.तेरेव। तदेवमावृत्य[5] वस्त्वन्तराव-गतौ सहोक्तेः सहभावाभावादर्थान्वये परिहाणिः प्रसज्येत। नैत-दस्तीति। यस्मात् सहोक्तिरित्युक्तम्, न पुनः सहप्रतिपत्तिरिति। तेनात्यन्तसहाभिधानमेव प्रतिपन्नोत्कर्षावगतिरिति[6] न किंचिदसंबद्धम्।

कैश्चिदेषा समासोक्तिः सहोक्तिः कैश्चिदुच्यते
अर्थान्वियाच्च[7] विद्वद्भिरन्यैरन्यत्वमेतयोः॥

---

(1) Lacuna marked in MS. (2) तस्मिन् here probably refers to ०श्लेष. (3) सामान्या यत्र MS. (4) The MS is corrupt here and reads : यथा हि कश्चिद्दोषः तस्मादलङ्करणमलङ्करणान्तरं क्वचिदङ्गभावं न जनयतीति, which gives no consistent sense. (5) सावृत्य MS. (6) प्रतिपन्नोहं कर्मावगतेरिति MS. (7) ०न्वया स MS.

This is followed by a brief treatment of the figure *dṛṣṭānta*, of which the missing *kārikā* may be partly given as follows :

The figure *dṛṣṭānta*

वस्तुसाम्यं समाश्रित्य यदन्यस्य प्रदर्शनम् ।

explained as : दृष्टान्तं तावदभिधत्ते—वस्तुसाम्येत्यादि । यदन्यस्य वर्ण्य[मान]प्रस्तुताद्व्यतिरिक्तवृत्तेः पदार्थान्तरस्य प्रदर्शन[1]-मुपनिबन्धनं स दृष्टान्तनामालंकारोऽभिधीयते । कथम्—वस्तु-साम्यं समाश्रित्य । वस्तुनः पदार्थयोर्द्दृष्टान्तदार्ष्टान्तिकयोः साम्यं सादृश्यं समाश्रित्य निमित्तीकृत्य । लिङ्गसंख्याविभक्तिस्वरूप-साम्यवर्जितमिति वस्तुग्रहणम् । The example given consists of the first three lines of the verse सरसिजमनुबिद्धं from *Abhijñāna-Śakuntala* i. 20. (पादत्रय-यमेवोहरणम्, चतुर्थे भूषणान्तरसंभवात्) ।

The figure *arthāntara-nyāsa* is next taken up, of which the missing *kārikā* may be conjecturally restored thus :

The figure *arthāntara-nyāsa*

वाक्यार्थान्तरविन्यासो मुख्यतात्पर्यसाम्यतः ।
ज्ञेयः सोऽर्थान्तरन्यासः यः समर्पकतयाहितः ॥

The explanation is as follows : अर्थान्तरन्यासमभिधत्ते—वाक्यार्थेत्यादि । ज्ञेयः सोऽर्थान्तरन्यासः [अर्थान्तरन्यास]नामा-लंकारो ज्ञेयः परिज्ञातः । कः—यः वाक्यार्थान्तरविन्यासः । परस्परा-न्वितपदसमुदायाभिधेयवस्तु वाक्यार्थः तस्मादन्यत्[2] प्रकृतत्वात् प्रस्तुतव्यतिरेकि[3] वाक्यार्थान्तरम् । तस्य[4] विन्यासो विशिष्टं न्यसनं[5] तद्विदाह्लादकारितयोपनिबन्धः[6]। कस्मात् कारणात्[7]—

(1) पदार्थान्तरस्याप्रदर्शनं MS. (2) तस्मादन्यत्र MS. (3) ०व्यतिरेके MS. (4) न्यस्य MS. (5) नसङ्गतं MS. (6) ०निबद्धः MS. (7) तस्मात् MS.

मुख्य[1]तात्पर्यसाम्यतः[2]। मुख्यं प्रस्तावाधिकृतत्वात् प्रधानभूतं वस्तु, तस्य तात्पर्यं यत्परत्वेन.....[3] तस्य साम्यतः[4] सादृश्यत्। कथम्—समर्पकतया[5]हितः। समर्पकत्वेनोपनिबद्धः, तत्तदुपपत्तियोजनेनेति[6] यावत्। The examples given consist of the last line of the verse सरसिजमनुविद्धं already quoted from *Sakuntalā*, and the verse असंशयं क्षत्रपरिग्रहक्षमा from the same drama (i. 22).

The figure *ākṣepa*

The *kārikā* on the figure *ākṣepa*, which is next dealt with, may be given thus :

निषेधच्छाययाक्षेपः कान्तिं प्रथयितुं पराम्।
आक्षेप इति स ज्ञेयः प्रस्तुतस्यैव वस्तुनः॥

Explained as : आक्षेपमभिधत्ते—निषेधच्छाययेत्यादि। आक्षेप इति स ज्ञेयः सोऽयमाक्षेपालंकारो ज्ञातव्यः। स[7] कीदृशः—प्रस्तुतस्यैव वस्तुनः प्रकृतस्यैवार्थस्य आक्षेपः क्षेपकृत्[8]। अभिप्रेतस्यापि निर्वर्तनमिति[9]। कथम्—निषेधच्छायया प्रतिषेधविच्छित्त्या। किमर्थम्—कान्तिं प्रथयितुं पराम्। उपशोभां प्रकटयितुं प्रकृष्टाम्। The illustration given is a Prakrit verse which is hopelessly corrupt and unintelligible in the MS.

Minor poetic figures. *vibhāvanā*

Having dealt with all the important poetic figures, Kuntaka now concludes the chapter with some general remarks on the subject, incidentally discussing

(1) मुख्ये MS. (2) स्याद्यतां MS. (3) The MS is hopelessly corrupt here and reads : यत्परत्वेन तद्भ्रमन्तं. (4) तस्मात् साम्यात् MS. (5) यथा for ०तथा MS. (6) तुतदुपपत्तियोजनतेनेति MS. (7) यः MS. (8) MS reads प्राकृतस्यैतार्थस्य क्षपकृत्. (9) निवर्तनमिति MS.

some minor figures. The figure *vibhāvanā* is first dealt with. The *kārikā* may be reconstructed thus :

वर्णनीयस्य केनापि विशेषेण विभावना ।
स्वकारणपरित्यागपूर्वकं कान्तिसिद्धये ।।

Explained as follows: एवंस्वरूपं प्रतिषेधवैचित्र्य[1]च्छायातिशयमलंकरणमभिधाय कारणप्रतिषेधोत्तेजितातिशयमभिधत्ते—स्वकारणेत्यादि । वर्णनीयस्य प्रस्तुतस्यार्थस्य विशेषेण केनाप्यलौकिकेन रूपान्तरेण विभावनेत्यलंकृतिरभिधीयते ।.....[2] कथम्—स्वकारणपरित्यागपूर्वकम् । तस्य विशेषस्य[3] स्वमात्मीयं[4] कारणं[5] यन्निमित्तं[6] [त]स्य परित्यागः प्रहाणं पूर्वं प्रथमं यत्र । तत्कृत्वेत्यर्थः । किमर्थम्—कान्तिसिद्धये[7] शोभा[निष्पत्तये] । तदिदमुक्तं भवति—यया लोकोत्तरविशेषविशिष्टता वर्णनीयतां नीयते । यथा—

असंभृतं मण्डनमङ्गयष्टेरनासवाख्यं करणं मदस्य ।
कामस्य पुष्पव्यतिरिक्तमस्त्रं बाल्यात्परं साथ वयः प्रपेदे[8] ।।

अत्र कृत्रिमकारणपरित्यागपूर्वकं लोकोत्तरसहजविशेषविशिष्टता कवेकवेरभिप्रेता ।

This is followed by a reference to the figure *sasaṃdeha*, the *kārikā* of which is difficult to reconstruct :

The figure *sasaṃdeha*

यस्मिन्नुत्प्रेक्षितं रूपं संदेहमेति वस्तुनः (?) ।
उत्प्रेक्षान्तरसद्भावाद् विच्छित्त्यै तत्..... ।।

(1) ०वैचित्र MS. (2) The line omitted here, beginning with तदयमत्रार्थः, is corrupt and gives no sense. (3) विनाशेषस्य MS. (4) स्वमात्मौ MS. (5) करणं MS. (6) यन्निमित्त MS. (7) MS reads कान्तियष्टये which is obviously corrupt : the emendation is conjectural. (8) *Kumāra* 1. 31.

The commentary is pretty clear : तदेवमसंभाव्यकारणत्वादविभाव्यमानस्वभावतां विचार्य विचारगोचरस्वरूपतया स्वरूपसन्देहसमर्पितातिशयमभिधत्ते—यस्मिन्नित्यादि[1]। यस्मिन्नलंकरणे संभावनानुमानात् साम्यसमन्वयाच्च स्वरूपान्तरसमारोपद्वारेण[2] उत्प्रेक्षितं प्रतिभालिखितं रूपं पदार्थपरिस्पन्दलक्षणं सन्देहमेति संशयमारोहति। कस्मात्कारणात्—उत्प्रेक्षान्तरसद्भावात्। उत्प्रेक्षाप्रकर्षपरस्यापि तद्विषयस्य सद्भावात्। किमर्थम्—विच्छित्त्यै शोभायै तदेवंविधमभिधावैचित्र्यं संदेहाभिधानं[3] वदन्ति। यथा

रञ्जिता नु विविधास्तरुशैला
नामिता नु गगनं स्थगितं नु।
पूरिता नु विषमेषु धरित्री
संहृता नु ककुभस्तिमिरेण ॥[4]

निमीलदाकेकरलोलचक्षुषां (प्रियोपकण्ठं) कृतगात्रवेपथुः।
निमज्जतीनां श्वसितोद्धतस्तनः श्रमो नु तासां मदनो नु पप्रथे ॥[5]

There are two more examples ; one in Prakrit, too corrupt and unintelligible, and the other in Sanskrit, which may be given here :

किं सौन्दर्यमहार्थसंचितजगत्कोशैकरत्नं[6] विधेः[7]
किं शृङ्गारसरःसरोरुहमिदं[8] स्यात् सौकुमार्यावधि।
किं लावण्यपयोनिधेरभिनवं बिम्बं सुधादीधिते-
र्वक्तुं कान्ततमाननं[9] तव मया साम्यं न निश्चीयते ॥

---

(1) यस्मादित्यादि MS. (2) See Kuntaka's definition of उत्प्रेक्षा above. (3) सदाह[illegible]मानं MS. (4) *Kirāta*° ix. 15. (5) *Kirāta* viii. 53. (6) ०करत्वं MS. (7) विधौ MS. (8) शृङ्गारपरस्पर..... रुहं MS. (9) ०मानसे MS.

This figure, in Kuntaka's opinion is only of one kind, being based on *utprekṣā* (ससंदेहस्यकविधप्रकारत्वमुत्प्रेक्षामूलत्वात्).

Then comes the figure *apahnuti*, which is defined as follows (the missing *kārikā* restored conjecturally):

अन्यदर्पयितुं रूपं वर्णनीयस्य वस्तुनः ।
स्वरूपापह्नवो यस्यामसावपह्नुतिर्मता ।।

Explained as follows: एवं स्वरूपसंदेहसुन्दरं ससंदेहमभिधाय स्वरूपापह्नुतिरमणीया[1] मपह्नुतिमभिधत्ते—अन्यदित्यादि ।

The figure *apahnuti.*

पूर्ववदुत्प्रेक्षामूलत्वमेव जीवितमस्याः[2] । संभावना[3]-नुमानात् सादृश्याच्च वर्णनीयस्य वस्तुनः प्रस्तुतस्यार्थस्य अन्यत् किमप्यपूर्वं रूपमर्पयितुं रूपान्तरं [विधातुं] स्वरूपापह्नवः स्वभावापलापः संभवति यस्याम्, असौ तथाविध[4]भणितिरेवापह्नुतिर्मता[5] प्रतिभाता तद्विदाम्[6] । Of the three examples given of this figure the first (in *Śārdūlavikrīḍita* metre) is exceedingly corrupt and full of lacunae in the MS ; the second can be given tentatively as follows :

पूर्णेन्दोः परिपोषकान्तिवपुषः स्फारप्रभाभासुरं
नेदं मण्डलमभ्युदेति गगने भासोज्जिहीर्षोर्जगत्[7] ।
मारस्योच्छ्रितमातपत्रमधुना[8] पाण्डुप्रदोषश्रियो[9]
मानो बन्धुजनाभि[लाष]दलनोऽद्योच्छिद्यते किं न ते[10] ।।

---

(1) Corrupt in MS, and reads ०स्वरूपावल्गवयरसणीय०. (2) जीवितस्यानु MS. (3) सम्भावनेन MS. (4) तेषां विध० MS. (5) महता MS. (6) तद्विधं MS. (7) भासौ जिहीर्षा जगत् MS. (8) मारस्योच्छतरेतपत्रमधुनो (marked as corrupt), पाण्डुः MS. (9) ०श्रितो MS. (10) ०दलनोद्योच्छेकयाकिनः (marked as corrupt) MS.

The third example is तव कुसुमशरत्वम् from *Abhijñāna-śakuntala* iii. 55.

Saṃsṛiti and *Saṃkara*

Kuntaka now proceeds to deal with the cases of संसृष्टि and संकर of two or more poetic figures. The *kārikās* cannot be restored, nor is the *vṛtti* on them fully intelligible. There are two illustrative verses under the first head, which may by given thus :

आश्लिष्टो नवकुङ्कुमारुणरविव्यालोकितैराश्रितो[1]
लम्बान्ताम्बरया[2] समेत्य भुवने ध्यानान्तरे सन्ध्यया ।
चन्द्रांशूत्करकोरकाकुलमतिर्ध्वान्तद्विरेफोऽधुना[3]
देव्या स्थापितदोहदे[4] कुरवके भाति प्रदोषागमः ।।

The second would read thus :

म्लानिं वान्तविषानलेन[5] नयनव्यापारलब्धात्मना
नीता राजभुजङ्ग पल्लवमृदुर्नूनं[6] लतेयं त्वया ।
अस्मिन्नीश्वरशेखरेन्दुकिरणस्मेरस्थलीलाञ्चिते
कैलासोपवने यथा सुगहने नैति प्ररोहं पुनः ।।

The verse cited as an example of सङ्कीर्ण has lost some letters in the first line :

(रूढा जालैर्जटाना) मुरगपतिफणैस्तत्र पातालकुक्षौ
प्रोद्यद्वालाङ्कुरश्रीर्दिशि दिशि दशनैरेभिराशागजानाम् ।।

---

(1) ०व्यलोकितैकसृतं MS. Our emendation is conjectural. (2) लम्बारम्बरया MS. (3) कुलपतेध्वान्तद्विरेभाधना MS. (4) वापितदोहदे MS. (5) वेमावषानलेन MS. (6) पल्लवमुहुर्नामा MS.

अस्मिन्नाकाशदेशे विकशितकुसुमा[1] राशिभिस्तारकाणां
नाथ त्वत्कीर्तिवल्ली फलति फलमिदं बिम्बमिन्दोः सुराद्रेः ।।

Other examples are निर्मोकमुक्तिरिव गगनोरगस्य already cited[2], and अस्याः सर्गविधौ from *Vikramorvaśīya* I. 9 (already cited p. 140).

Other poetic figures.

Having defined and illustrated all the important poetic figures, Kuntaka says that he is not prepared to accept any other figure that, may still remain undefined, as independent figures, because they may either be reduced to some figure already defined or because they do not possess the essential charm which is necessary to constitute a poetic figure. He says (the *kārikā* conjecturally reconstructed):

भूषणान्तरभावेन शोभाशून्यतया तथा ।
अलंकारास्तु ये केचिन्नालंकारतया मनाक् ।।

Explained as: एवं यथोपपत्त्यालंकारान् लक्षयित्वा केषांचिद[3]-लक्षितत्वाल्लक्षणव्याप्तिदोषं परिहर्तुमुपक्रमते—भूषणेत्यादि। ये पूर्वोक्तव्यतिरिक्ताः केचिदलंकारास्तेऽलंकारतया मनाङ् न विभूषणत्वेनाभ्युपगताः। केन हेतुना—भूषणान्तरभावेन। तेभ्यो व्यतिरिक्तमन्यद् [भूषणं] भषणान्तरम्, तत्स्वभावत्वेन[4] पूर्वोक्तानामेवान्यतमत्वेनेत्यर्थः। शोभाशून्यतया तथा—शोभा कान्तिस्तया शून्यं

(1) ०कुरग०, पोतालकुक्षेः and ०कुसुम in MS. (2) See above p. 193.
(3) केशाविद० MS. (4) नदावेदनत्वेन MS.

रहितं शोभाशून्यम्, तस्य भावः शोभाशून्यता तया हेतुभूतया.....[1] तेषामलंकरणत्वमनुपपन्नम् ।

In this way, he rejects the claim of *yathāsaṃkhya* to be considered as a *alaṃkāra*, although it is so considered by older writers (पूर्वैराम्नातः) and quoting Bhāmaha's example of that figure, he criticises it by saying that it lacks the requisite charm (भणितिवैचित्र्यविरहान्न काचिदत्र कान्तिर्विद्यते)[2]. He finds fault with those who enumerate *āśīḥ* as a figure and remarks: आशिषो लक्षणोदाहरणानि[3] नेह पठ्यन्ते[4], तेषु चाशंसनीयस्यैवार्थस्य मुख्यतया वर्णनीयत्वादलंकार्यत्वमिति प्रेयोऽलंकारोक्तानि दूषणान्यापतन्ति । The case of *viśeṣokti* is the same: विशेषोक्तेरलंकारान्तरभावेना[5]लंकारतया च भूषणत्वानुपपत्तिः[6] । Quoting Bhāmaha's example of this figure (iii. 22)

Figures rejected as such.

स एकस्त्रीणि जयति जगन्ति कुसुमायुधः ।
हरतापि तनुं यस्य शम्भुना न हृतं बलम् ।।

he remarks अत्र सकललोकप्रसिद्धजयित्वव्यतिरेकिकन्दर्पस्वभावमात्रमेव वाक्यार्थः । Kuntaka next quotes with approval Bhāmaha's *kārikā* (ii. 86) which rejects *hetu*, *sūkṣma* and *leśa* as figures, because they do not

(1) The line omitted here is corrupt and gives no sense. (2) Jayaratha (pp. 148-9), following Kuntaka, rejects यथासंख्य. from the enumeration of poetic figures and refers to this passage of Kuntaka. (3) सुलापात्यहरणानि MS. (4) पथ्यन्ते MS. (5) ०लङ्कारान्तर्भाविना MS. (6) ०नुपपत्तेः MS.

manifest any *vaicitrya* or charmigness of expression. Under the first figure, he cites and criticises the verse सङ्केतकालमनसं विटं ज्ञात्वा (already quoted in *Dhvanyāloka* p. 103); and under the second and third figures respectively, Kuntaka cites and criticises Daṇḍin ii. 266 (राजकन्यानुरक्तं मां) and 236 (अयमान्दोलितप्रौढ°). He thinks that in these cases स्वभावमात्रमेव रमणीयम्, and hence they are *alaṃkārya* and not *alaṃkāra*. In the same way, he rejects *upamā-rūpaka* which is regarded by Bhāmaha as an independent *alaṃkāra* (केचिदुपमारूपकाणामलंकरण[त्वं] मन्यन्ते, तदयुक्तम्, अनुपपद्यमानत्वात्), quoting and commenting on Bhāmaha's example of the figure (समस्तगगनाभोगम् iii. 35).

Kuntaka concludes this chapter with a *kārikā* in *Śārdūla-vikrīḍita* metre on the general nature of वस्तुवक्रता (वस्तुवक्रतास्वरूपमासूत्रयति). As the *vṛtti* itself is corrupt in places, the missing *kārikā* cannot be entirely restored, but it appears to contain a comparison between poetic speech(वाक्) and नायिका ;

लावण्यादिगुणोज्ज्वला प्रतिपदन्यासैर्विलासाञ्चिता
विच्छित्त्या रचितैर्विभूषणभरैरल्पैर्मनोहारिणी ।
अत्यर्थं रसवत्तयार्द्रहृदया·····उदाराभिधा
वाक्·····मनोहर्तुं यथा नायिका ।।

The colophon to this chapter reads : इति कुन्तलकविरचिते वक्रोक्तिजीविते तृतीयोन्मेषः समाप्तः ।। श्रीः ।।

Unmesa IV

This chapter opens with a *kārikā* on *prakaraṇa-vakratā*, of which the latter part is probably lost and the *vṛtti* on which is corrupt. It runs thus :

Prakaraṇa-vakratā

एवं सकलसाहित्यसर्वस्वकल्पवाक्यवक्रताप्रकाशनानन्तरमवसर-प्राप्तां प्रकरणवक्रतामवतारयति—

यत्र निर्यन्त्रणोत्साहपरिस्पन्दोपशोभिनी[1] ।
व्यावृत्तिर्व्यवहर्तृणां स्वाशयोल्लेखशालिनी[2] ।।१।।
अव्यामूलादनाशङ्क्यसमुत्थाने मनोरथे[3] ।
काप्युन्मीलति निःसीमा सा प्रबन्धस्य[4] वक्रता ।।२।।

[वक्रता] वक्रभावो भवतीति संबन्धः । कीदृशी—निःसीमा निरवधिः । यत्र यस्यां व्यवहर्तृणां तद्व्यापारपरिग्रहव्यग्राणां व्यावृत्तिः प्रवृत्तिः काप्यालौकिकी उन्मीलति उद्भिद्यते । किंविशिष्टा—निर्यन्त्रणोत्साहपरिस्पन्दोपशोभिनी निरर्गलव्यवसायस्फुरितस्फार-विच्छित्तिः । अतएव स्वाशयोल्लेखशालिनी निरुपमनि[ज]हृदयो-ल्लासितालंकृतिः । कस्मिन् सति—अव्यामूलादनाशङ्क्य समुत्थाने मनोरथे । कन्दात्प्रभृत्यसंभाव्यसमुद्भेदे समीहिते । तदय-मत्रार्थः.....Then he goes on to quote as examples of प्रकरणवक्रता from the third act (entitled सेतुबन्ध) of a drama cited as अभिजातजानकी ;

तत्र नीलस्य सेनापतेर्वचनम्

---

(1) ०शोभिनि MS. (2) ०शालिनि MS. (3) ०मनोहरे MS. The reading is corrupt : अव्यमूलादीनांशक्य. (4) *sic* in MS : but we expect प्रकरणवक्रता. The reading probably is सा प्रबन्धाशंवक्रता ।

शैलाः सन्ति सहस्रशः प्रतिदिशं वल्मीककल्पा इमे
दोर्दण्डाश्च[1] कठोरविक्रमरसक्रीडासमुत्कण्ठकाः ।
कर्णास्वादितजम्भसंभावकथा[2] किन्नाम कल्लोलिनी
प्रायो गोष्पदपूरणेऽपि कपयः कौतूहलं नास्ति वः ।।

वानराणामुत्तरवाक्यं नेपथ्ये कलकलानन्तरम्

आन्दोल्यन्ते कति न गिरयः कन्दुकानन्दमुद्रां
व्यातत्वानां करपरिसरे कौतुकोत्कर्षहर्षे[3] ।
लोपामुद्रापरिवृढकथाभिज्ञताप्यस्ति किन्तु
व्रीडावेशः पवनतनयोच्छिष्टसंस्पर्शनेन ।।
.....रामेण पर्यनुयुक्तजाम्बवतोऽपि वाक्यम् ।
अनङ्कुरितनिःसीमैमनोरथरुहेष्वपि[4] ।
कृतिनस्तुल्यसंरम्भमारभन्ते[5] जयन्ति च ।।

एवंविधमपरमपि । तत एव विभावनीयमभिनवाद्भुतं भोगभङ्गी-सुभगं सुभाषितसर्वस्वम् । As another example of प्रकरणवक्रता Kuntaka cites from *Raghu°* canto v the episode of Raghu and Kautsa, quoting and commenting on the verses किं वस्तु विद्वन् गुरवे प्रदेयम् (v. 18), तं भूपतिर्भासुरहेम-राशिम् (v.30), गुर्वर्थमर्थी श्रुतपारदृश्वा (v.24) and जनस्य साकेत-निवासिनस्तौ (v. 31), and remarking कुवेरं प्रति सामन्तसंभा-वनया जयाध्यवसायः कामपि सहृदयहृयदहारितां प्रतिपद्यते ।..... अन्यच्च, 'जनस्य साकेत' इत्यादि अत्रापि गुरुप्रदेयदक्षिणातिरिक्तकार्त-स्वरमप्रतिगृह्णतः कौत्सस्य, रघोरपि प्रार्थितशतगुणं सहस्रगुणं वा प्रयच्छतो निरवधि[निः]स्पृहतौदार्यसंपत्साकेतवासिनमाश्रित्यापूर्वा[6]

(1) दोर्दण्डाप० MS. (2) Is it जह्नुसम्भवकथा ? (3) ०हर्ष MS. (4) रुषास्वपि MS. (5) ०मारम्भन्ते MS. (6) ०श्रित्य पूर्वः MS.

कामपि महोत्सवमुद्रामाततान। एवमेषां महाकविप्रबन्धेषु प्रकरण-वक्रताविच्छित्तिः रसनिष्यन्दिनी सहृदयैः स्वयमुत्प्रेक्षणीया।

Then Kuntaka goes on:

इमामेव प्रकारान्तरेण प्रकाशयति—

इतिवृत्तप्रयुक्तेऽपि कथावैचित्र्यवर्त्मनि।
उत्पाद्यलवलावण्यादन्या भवति[1] वक्रता ॥३॥
(तथा) यथा प्रबन्धस्य सकलस्यापि जीवितम्।
भाति प्रकरणं काष्ठाधिरूढरसनिर्भरम् ॥४॥

तथा उत्पाद्यलवलावण्यादन्या भवति[2] वक्रता—तेन प्रकारेण कृत्रिमसंविधानकमनीयकालौकिकी वक्रभावभङ्गी समुज्जृम्भते, सहृदयानावर्जयतीति यावत्। क्व[3]—कथावैचित्र्यवर्त्मनि काव्यस्य .....[4] वैचित्र्यभावमार्गे। किंविशिष्टे—इतिवृत्तप्रयुक्तेऽपि इतिहासपरिग्रहेऽपि। तथेति यथाप्रयोगमपेक्षत इत्याह—यथा प्रबन्धस्य सकलस्यापि जीवितं भाति प्रकरणम्। येन प्रकारेण सर्गबन्धादेः[5] समग्रस्यापि प्राणप्रतिमम्[6] अङ्गम्। कीदृग्भूतम्—काष्ठाधिरूढ-रसनिर्भरम्। प्रथमधाराध्यासितशृङ्गारादिपरिपूर्णम्। As an example Kuntaka quotes and comments on the introduction of the curse of Durvāsas in the *Abhijñāna-śakuntala* and its effect on the king's mind, citing in this connexion the verse विचिन्तयन्ती यमनन्यमानसा (iv. 87), रम्याणि वीक्ष्य मधुरांश्च (v. 04), प्रत्यादिष्टविशेषमण्डन (vi. 138), and आश्लिष्टबालतरु° (vi. 152)[7]. Then he adds:

(1) ०दन्यावगति MS. (2) ०दन्य लवति MS. (3) स MS. (4) The words omitted are corrupt and read वीरवीचि. (5) MS repeats सकलस्यापि here. (6) प्राणप्रियं MS. (7) The commentary portion is so corrupt that it is not possible either to follow the remarks or give an intelligible summary of it.

उत्पाद्यलवलावण्यादिति द्विधा व्याख्येयम्। क्वचिदसदेवोत्पाद्यम् अथवा[1] आहृतम् क्वचिदौच्चित्यत्यक्तं सदप्यन्यथा संपाद्यं[2] सहृदय-हृदयाह्लादनाय।यथोदात्तराघवे मारीचवधः। तच्च प्रागेव (पः ४२) व्याख्यातम्। एवमन्यदप्यस्या वक्रताविच्छित्तेरुदाहरणं महाकवि-प्रबन्धेषु स्वयमेवोत्प्रेक्षणीयम्।

निरन्तररसोद्गारगर्भसन्दर्भनिर्भराः।
गिरः कवीनां जीवन्ति न कथामात्रमाश्रिताः॥

इत्यन्तरश्लोकः।

Then he goes on to the next *kārikā* on the subject :

अपरमपि प्रकरणवक्रताप्रकारमाविर्भावयति—

प्रबन्धस्यैकदेशानां फलबन्धानुबन्धवान्।
उपकार्योपकर्तृत्वपरिस्पन्दः परिस्फुरन्॥५॥
असामान्यसमुल्लेखप्रतिभाप्रतिभासिनः।
सूते नूतनवक्रत्वरहस्यं कस्यचित्कवेः॥६॥

सूते[3] समुन्मीलयति। किम्—नूतनवक्रत्वरहस्यम् अभिनवक्रभावो-पनिषदम्। कस्यचित्, न सर्वस्य कवेः ...[4]प्रस्तुतौचित्यचारुरचना-विचक्षणस्येति यावत्। कः—उपकार्योपकर्तृत्वपरिस्पन्दः, अनुग्राह्या-नुग्राहकत्वमहिमा। किं कुर्वन्—परिस्फुरन्, समान...(उ)न्मी-लन्। किंविशिष्टः—फलबन्धानुबन्धवान्, प्रधानकार्यानुसन्धानवान्, कार्यानुसन्धाननिपुणः। कस्यैवंविध[5] इत्याह—असामान्यसमुल्लेख-प्रतिभाप्रतिभासिनः निरुपमोन्मीलितशक्तिविभावभ्राजिष्णोः[6]।

(1) यथा वा MS. (2) न मान्यं MS. (3) Portions of the वृत्ति from here up to प्रतिभाप्रतिभासिनः are repeated in the MS. (4) The word omitted as corrupt here is given as कविनः in one place and कथितः in another, in the MS. (5) कथमहमेवंविध MS. (6) ०भ्राजिष्णु MS.

केषाम्—प्रबन्धस्यैकदेशानाम् प्रकरणानाम् । तदिदमुक्तं भवति ....[1] संनिवेशशोभिनां प्रबन्धावयवानां प्रधानकार्य[2]संबन्धनिबन्ध(ना)नुग्राह्यग्राहकभावः स्वभावसुभगप्रतिभाप्रकाश्यमानः कस्यचिद्विचक्षणस्य[3] वक्र[ता]चमत्कारिणः कवेरलौकिकं वक्रतोल्लेखलावण्यं समुल्लासयति। यथा पुष्पदूषितके[4] द्वितीयेऽङ्के प्रस्थानात् प्रतिनिवृत्त्य...[5]अमन्दमदनोन्मादमुद्रेण समुद्रदत्तेन निजमहिमकेतनं तुल्यदिवसमानन्दयन्ती(?) ... [6]प्रविशता प्रकम्पावेगविकलालसकाय[7]निपातनिहितनिद्रस्य द्वारदेशशायिनः...[8]कुवलयस्योत्कोचकारणं स्वकरादङ्गुलीयकदानं यत्कृतं तच्चतुर्थेऽङ्के मथुराप्रतिनिवृत्तेन तेनैव...[9]निष्क्रम्य समावेदितसमुद्रदत्तवृत्तान्तेन कुलकलङ्कातङ्ककदर्थ्यमानस्य सार्थवाहसागरदत्तस्य स्वतनयस्पर्शमान...[10] शीलशुद्धिमुन्मीलयत्तदुपकाराय कल्प्यते[11]। .....यथा चोत्तररामचरिते पृथुगर्भभरखेदितदेहाया विदेहराजदुहितुर्विनोदाय दाशरथिना चिरन्तनराजचरितचित्ररुचि दर्शयता निर्व्याजविजयिविजृम्भमाणजृम्भकास्त्राण्युद्दिश्य 'सर्वथेदानीं त्वत्प्रसूतिमुपस्थास्यन्ति' (Act i, p.22) इति यदभिहितं तत्पञ्चमेऽङ्के प्रवीरचर्याचतुरेण चन्द्रकेतुना क्षणं समरकेलिमाकाङ्क्षता तदन्तरायकलितकलकलाडम्बराणां वरूथिनीनां

---

(1) The word omitted is corrupt and reads प्रातर्विक (सार्वत्रिक?) in MS. (2) प्रधानबल० MS. (3) विचक्षणः MS. (4) This lost drama is quoted in दशरूपकावलोक (ed. Parab iii. 72, p. 72) and apparently in साहित्यदर्पण vi. 225 (quoted as पुष्पभूषितक). (5) The passage omitted as corrupt reads : निविडानुकारदः नवरायाविभावादर्या. (6) The omitted corrupt passage reads : समाननाय मणिसुचेनेव (मलिम्लुचेनेव?). (7) ०विकललासकायन MS. (8) The omitted corrupt words read in MS. as कदाहायमानस्य. (9) The words omitted as corrupt read : शमदमस्य. (10) The words omitted as corrupt are : समाविदूरसुषा. (11) The rest of the passage (one line) is hopelessly corrupt and unintelligible.

सह[ज]जयोत्कण्ठाभ्राजिष्णोर्जानकीनन्दनस्य जृम्भकास्त्रव्यापारेण कमप्युपकारमुत्पादयति। तथा च तत्र—

लवः[1]—भवतु जृम्भकास्त्रेण तावत्सैन्यानि स्तम्भयामि। इति

सुमन्त्रः (ससंभ्रमम्)—

वत्स, कुमारेणानेन जृम्भकास्त्रमभिमन्त्रितम्।

चन्द्रकेतुः—आर्य, कः सन्देहः।

व्यतिकर इव भीमो वैद्युतस्तामसश्च
प्रणिहितमपि चक्षुर्ग्रस्तमुक्तं हिनस्ति।
अभिलिखितमिवैतत्सैन्यमस्पन्दमास्ते
नियतमजितवीर्यं जृम्भते जृम्भकास्त्रम्॥

आश्चर्यम्—

पतालोदरकुञ्जपुञ्जित[2](तमः)श्यामैर्नभोजृम्भकै-
रन्तःप्रस्फुरदारकूटकपिल(ज्योति)र्ज्वलद्दीप्तिभिः।
कल्पाक्षेपकठोरभैरवमरुद्व्यस्तैरवस्तीर्यते
नीलाम्भोदतडित्कडारकुहरैर्विन्ध्याद्रिकूटैरिव॥

इत्यादि। तत एक एवायम्। 'एकदेशानाम्'[3] इति बहुवचन अत्र द्वयोरपि बहूनाम् उपकार्योपकारकत्वं स्वयमुत्प्रेक्षणीयम्।

Kuntaka continues to describe another variety of this *vakratā* :

अस्या एव प्रकारान्तरं प्रकाशयति—

प्रतिप्रकरणं प्रौढप्रतिभाभोगयोजितः।
एक एवाभिधेयात्मा बध्यमानः पुनः पुनः॥७॥

---

(1) The readings of this extract from उत्तररामचरित Act V, differ in many places from those of the printed editions. (2) कूजित only in MS for कुञ्जपुञ्जित० (3) एकदेश्यतामेति MS.

अन्यूननूतनोल्लेखरसालंकरणोज्ज्वलः ।
बध्नाति वक्रतोद्भेदभङ्गीमुत्पादिताद्भुताम् ॥८॥

बध्नातीति[1] अत्र निबिडयतीति यावत् । काम्—वक्रतोद्भेदभङ्गीम्, वक्रभावाविर्भावात्[2] शोभाम् । किंविशिष्टाम्—उत्पादिताद्भुताम्, कन्दलितकुतूहलाम् । कः[3]—एक एवाभिधेयात्मा, तदेव वस्तुस्वरूपम् । किंक्रियमाणम्—बध्यमानम्[4] प्रस्तुतौचित्यचारु[5]रचनागोचरतामापद्यमानम्[6] । कथम्—पुनः पुनः वारं वारम् । क्व—प्रतिप्रकरणम्, प्रकरणे प्रकरणे, स्थाने स्थान इति यावत् । नन्वेवं पुनरुक्तपात्रतामसौ समासादयतीत्याह—अन्यूमनूतनोल्लेखरसालंकरणोज्ज्वलः, अविकलाभिनवोल्लासश्रृङ्गाररूपकादिपरिस्पन्दभ्राजिष्णुः । यस्मात् प्रोढप्रतिभाभोगयोजितः, प्रगल्भतरप्रज्ञाप्रकरप्रकाशितः । अयमस्य परमार्थः—तदेवं सकलचन्द्रोदय (दयादि ?)-प्रकरणप्रकारेषु वस्तु प्रस्तुत[7]कथासंविधानकानुरोधान् मुहुर्मुहुरुपनिबध्यमानं यदि परिपूर्णपूर्वविलक्षणरूपकाद्य[8]लंकाररामणीयकनिर्भरं भवति तदा कामपि रामणीयकमर्यादां वक्रतामवतारयति ।

After citing the *Harṣa-carita*[9] as affording an example of this variety of *vakratā*, Kuntaka quotes extensively from the drama *Tāpasa-vatsarāja-carita* charming illustrations of this form of प्रकरणवक्रता.

---

(1) The portion from Vṛtti from here up to अन्यूननूतनोल्लेख० is repeated in MS. but the readings are corrupt in both places. (2) MSS वक्रतां वाविर्भावात् in one place and वक्रभावाद्विर्भावात् in another place. (3) अतएव in the second or repeated passage. (4) वन्द्यमानं MS. (5) ०चाम in one place and ०चामर in another. (6) रचनामास्वन्दमानं in the first passage. (7) प्रस्तुतः MS. (8) विरूप for रूपकाद्य in MS. (9) It is not clear what episode is particularly referred to.

He comments on the pathos of the king's speech beginning with (Act ii)

कुरवकतरुगाढाश्लेषं मुखासवलालनां[1]
वकुलविटपी रक्ताशोकस्तथा चरणाहतिम्[2]।

but unfortunately the rest of the verse is corrupt in the MS. as well as the comments on it After referring to two other verses from the same drama (धारावेश्म विलोक्य and कर्णान्तस्थितपद्मराग°) already explained by himself[3], he quotes and discusses the following tearful सास्रं speech of the king (Act iii):

सर्वत्र ज्वलितेषु वेश्मसु भयादालीजने विद्रुते[4]
त्रासोत्कम्पविहस्तया प्रतिपदं देव्या[5] पतन्त्या तदा।
हा नाथेति मुहुः प्रलापपरया दग्धं वराक्या[6] तथा
शान्तेनापि वयं तु तेन दहनेनाद्यापि दह्यामहे[7]॥

Kuntaka points out the use of विरोधालंकार in the last line is to assist the pathetic sentiment (करुणरस) in the verse. Then the following verse is quoted from Act iv:

चतुर्थेऽङ्के राजा सकरुणमात्मगतम्

चक्षुर्यस्य तवाननादपगतं नाभूत् क्वचिन्निर्वृति-
र्येनैषा सततं त्वदेकशयनं वक्षःस्थली कल्पिता।

---

